


# सोमज्योतिः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य त्रैमासिकं वार्तापत्रम्



Shree Somnath Sanskrit University

Rajendra Bhuvan Road, Veraval - 362 266. Gir - Somnath (Gujarat)

Ph. : 02876-244532 Fax : 02876-244417 Website : www.sssu.ac.in



खैस्ताब्दः २०२० वैक्रमाब्दः २०७६ अङ्कः २३-२४ (संयुक्ताङ्कः) जनवरी-जून २०२०


## कुलपतिवाक्



मूलं महत्त्वम् आधत्ते। मूलमेव अस्फुटं सत् स्फुटतया दृश्यमानशाखापत्रादिषु रूपम्, पुष्पेषु गन्धम्, फलेषु च रसं निदधाति। मूलं रक्षितं संपोषितं च भवति चेत् शाखापत्रपुष्पफलादि सर्वं सुरक्षितं स्वस्वसार्थक्यसाधकं च भवति। अतो मूलं परिदृश्यमानं न भवति चेदपि तस्य महत्त्वं मनसि प्रणिधाय तत्संरक्षणे यत्नो विधेयः। रामायणे जाम्बवता अङ्गदः प्रोक्तोऽपि-

मूलमर्थस्य संरक्ष्यमेष कार्यविदां नयः।<br>
मूले हि सति सिध्यन्ति गुणाः सर्वे फलोदयाः।। (रा.किष्किन्धा. ६५/२५)

न केवलमेतत्, अपि तु स्वयमपि अस्माभिः शाखापत्रपुष्पादिगतपरिदृश्यमानतायाः विषये निरपेक्षैः मूलवत् अदृष्टरूपैः दृश्यमानविकसितशाखादिपोषकैरिव भवितव्यम्। यथा मूलं स्वशाखादिगतं रूपं न पश्यति, न च पुष्पगतं गन्धं जिघ्रति, न च फलगतं रसमास्वादयति, अपि तु तान् प्रत्येकं सततं सम्पोषयति, तथैव अस्माभिः स्वविद्यावंशगतच्छात्राणां शारीरिक-मानसिक-शैक्षणिकाध्यात्मिकविकासार्थं निरन्तरं यत्नः करणीयः। यथा मूलं भूमेरधः स्थित्वा भूमेः उपरिभागे वर्धमानवृक्षस्य सकलाभ्युदयार्थं सफलसुगन्धसमुल्लसनार्थं क्षणमेकमपि आत्मनः विश्रान्तिं न स्वीकरोति तथा नेपथ्ये विद्यमानैः आचार्यैः विश्वविद्यालयस्य पदाधिकारिभिः कर्मचारिभिश्च विश्वविद्यालयस्य भविष्णवश्छात्राः संरक्ष्याः संवर्धनीयाश्च सन्ति। छात्राः सन्तीत्यतः वयं सर्वे स्मः। छात्राणां प्रान्तीयराष्ट्रिय-अन्तारष्ट्रियस्तरेषु प्रतिष्ठया एव अस्माकं प्रतिष्ठा। अतः छात्रविकासैकलक्ष्याः वयं भवेम। नान्यः पन्थाः।

फरबरीमासे महता समारम्भेण विश्वविद्यालयस्य पदवीदानसमारोहः समनुष्ठितः। तेन सह "श्रीः" इत्याख्यस्य अतिथिभवनस्य, "बृहस्पतिः" इत्याख्यपुस्तकालयस्य च शिलान्यासोऽपि समागतैः महानुभावैः कृतः। ११-१३ फरवरीदिनाङ्केषु "भाष्यपरम्परा ज्ञानप्रवाहश्च" इति विषयमाश्रित्य एकः अन्ताराष्ट्रियः परिसंवादः आयोजितः। अनेके विद्वांसः अत्र आगत्य विषयांश्च उपस्थाप्य परिसंवादं परिसरं च कृतार्थीकृतवन्तः।

मार्चमासे निर्धारितपरीक्षासञ्चालनं यदा करणीयमासीत् तदानीमेव विश्वस्मिन् चीन-इटल्यादिदेशेषु व्याप्ता "कोविड-१९" इत्याख्या जीवाणुजन्या महामारी अस्माकं राष्ट्रे प्रायः सर्वत्र व्याप्ता इत्यतः "लाक डाउन" इत्याख्यो गृहावरोधः प्रारब्धः, स च क्रमशः वर्धमानोऽभवत्। परीक्षा स्थगिता। किन्तु छात्रावासीयाः छात्राः (बालकाः बालिकाश्च) सर्वैः आचार्यैः पदाधिकारिभिः कर्मचारिभिश्च मिलित्वा सुतरां परिसरे अवस्थापिताः, सयत्नं पोषिताः, सोत्साहम् अध्ययनकर्मणि प्रेरिताः अपि, अतः एतदर्थं सर्वे सुतरां वर्धाप्यन्ते। एतस्याः महामारीजन्यविपत्तेः पूर्वानुमानं नासीत्, पूर्वप्रस्तुतिरपि नासीत्। तथापि महता धैर्येण एतस्याः सम्मुखीनाः भूत्वा विश्वविद्यालयपरिवारस्य सर्वेऽपि सदस्याः कोरोनायोद्धारः संजाताः इति एतस्यां परीक्षायां सुतरां सर्वैः उत्तीर्णता अवाप्तेति प्रसन्नतायाः अयं विषयो विद्यते।

कोरोनामहामारीजन्यावरोधस्य दीर्घदीर्घतरत्वम् अवगत्य अन्तर्जाल(वेब-एक्स)मुखेन विश्वविद्यालयपक्षतः डा.नरेन्द्रकुमारपण्ड्या कर्तृक-श्रीमद्भागवतव्याख्यानमाला (९-२० मई) विविधविदुषां द्वारा विविधकविपरिचयः (२१ मई-३ जून), संस्कृतकविसम्मेलनम् (३० मई), कालिदाससप्ताहः (१६-२२ जून), संस्कृतवाङ्मयद्वारा व्यक्तित्वविकासः इति विषयमाश्रित्य विविधविदुषां व्याख्यानानि (२३-३० जून) इत्येतादृशाः बह्व्यः शैक्षणिकगतिविधयः निरवच्छिन्नतया समायोजिताः। एतन्मध्ये "शास्त्रपरिचयप्रकल्पः" इति शीर्षकेण दृश्य-श्रव्यसामग्रीनिर्माणमपि कृतम्। एतेषु सन्नद्धाः सर्वेऽपि भूयो भूयः सभाज्यन्ते। सर्वैरपि एतत् प्रमाणितं यत्- प्रतिकूलतायां सत्यामपि अस्माभिः कदापि स्वलक्ष्यतः विच्युतिर्न करणीया, न च सहनीया, न च स्वस्य गुणात्मकता उपेक्षणीयेति।

(प्रो. गोपबन्धु मिश्र)<br>
कुलपतिः

# कुलपतेः दैनन्दिनी

| | |
|---|---|
| ०७-०९.०१.२०२० | श्रीशङ्कराचार्यजन्मभूमौ कोच्चीकालटी इत्यत्र संस्कृतभारत्या अखिल भारतीय समीक्षायोजनासङ्गोष्ठ्याम् आध्यक्ष्यं निरवहत्। |
| ११-१३.०२.२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते अन्ताराष्ट्रियपरिसंवादे आध्यक्ष्यं निरवहत्। |
| १८.०२.२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते द्वादशपदवीदानसमारम्भे आध्यक्ष्यं निरवहत्। |
| २३.०२.२०२० | राजकोटजनपदस्थे वाङ्कानेरे संस्कृतभारत्याः प्रान्तसमीक्षागोष्ठ्याम् आध्यक्ष्यं निरवहत्। |
| २६-२७.०२.२०२० | मिदनापुरकोलेज, पश्चिमबङ्गालद्वारा "Recent Trends in Indian Women's Literature - 21st Century Perspective" इति विषये RUSA Sponsored अन्ताराष्ट्रिय-परिसंवादे आतिथ्यं निरवहत्। |
| १३.०३.२०२० | आर्षकेन्द्रे अक्षरधाम्नि गान्धीनगरे आयोजिते विश्वविद्यालयस्य कार्यकारिणीपरिषदः समित्याम् आध्यक्ष्यं निरवहत्। |
| १५.०३.२०२० | अक्षरे बङ्गलूरुनगरे संस्कृतभारत्याः अखिलभारतीयकार्यकर्तृगण-सङ्गोष्ठ्याम् आध्यक्ष्यं निरवहत्। |
| २१.०४.२०२० | कोरोनामाहामारीकाले सार्वजनिकप्रतिबन्धसन्दर्भे (लॉक-डाउन) माननीयशिक्षणमन्त्रिभिः श्रीभूपेन्द्रसिंहचूडासमामहोदयैः सह आन्त-र्जालिके उपवेशने भागग्रहणम्। |
| २२.०४.२०२० | संस्कृतभारत्या "संस्कृतेन स्वास्थ्यम्" इति विषये आयोजिते व्याख्याने मुख्यवक्तृत्वेन व्याख्यानं प्रस्तुतवान्। |
| ०९-२०.०५.२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितायां श्रीमद्भागवतमहा-पुराणस्य आन्तर्जालिक-व्याख्यानमालायाम् उद्घाटकत्वम् आध्यक्षत्वं च निरवहत्। |
| २९.०५.२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते आन्तर्जालिके शास्त्रपरिचय-प्रकल्पे आध्यक्ष्यं निरवहत्। |
| ३०.०५.२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते आन्तर्जालिके संस्कृत- कवि-सम्मेलने उद्घाटकत्वं निरवहत्। |
| १६-२२.०६.२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते ओनलाइन कालिदास-सप्ताहे आध्यक्ष्यं निरवहत्। |
| २१.०६.२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन "योगः एवं स्वास्थ्यम्" इति विषये आयोजिते ओनलाइन-कार्यक्रमे आध्यक्ष्यं निरवहत्। |

प्रधानसम्पादकः
प्रो. गोपबन्धु मिश्रः
कुलपतिः

प्रकाशकः
डॉ. दशरथ जादवः
कुलसचिवः

प्रबन्धसम्पादकः
श्री रवीन्द्र एस. काले
ग्रन्थपालः

सम्पादकाः
डॉ. नरेन्द्रकुमार एल. पण्ड्या
डॉ. ललितकुमार ए. पटेलः
डॉ. दीपेश विनोद कतिरा
डॉ. जानकीशरण आचार्यः
श्री जिगर भट्टः

News/Reports of events are invited for their publication in **SOMAJYOTIḤ** (Quarterly Newsletter of Shree Somnath Sanskrit University) from affiliated colleges, recognized study centers & approved research centers of Shree Somnath University in Sanskrit, Hindi or English.
News/Reports of events can be sent on following mail/postal address:

Address:
The Editor
"SOMAJYOTIḤ"
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval,
Dist Gir Somnath, Gujarat - 362 266.
(O) 02876 - 244532
E-mai: editor.somjyoti@sssu.ac.in

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य जालपुटेऽपि
''सोमज्योतिः'' द्रष्टुं शक्यते -
www.sssu.ac.in

Statement about the ownership and other particulars about newspapers

**SOMAJYOTIḤ**

FORM IV

(See Rule 8 under Section 5 of the Press and Registration of Book Act,1867)

| | | |
|---|---|---|
| 1. | Place of the Publication | : Shree Somnath Sanskrit University Veraval, Gujarat – 362266 |
| 2. | Periodicity of its Publication | : Quarterly |
| 3. | Printer's Name | : Jalaram Graphics & Offset |
| | Nationality | : Indian |
| | Address | : Behind Hotel Kaveri, Veraval-362266 |
| 4. | Publisher's Name | : The Registrar |
| | Nationality | : Indian |
| | Address | : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266 |
| 5. | Editor's Name | : Prof. Gopabandhu Mishra |
| | Nationality | : Indian |
| | Address | : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266 |
| 6. | Names & Addresses of Individuals who own the newspaper and partners or shareholders holding more than one percent of the total capital | : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266 |

I, Dr. Dashrath Jadav, Registrar, Shree Somnath Sanskrit University, Veraval, Gujarat hereby declare that the particulars given above are true to the best of my knowledge and belief.

Dr. Dashrath Jadav
Signature of Publisher

# विश्वविद्यालये सम्पन्नः द्वादशः पदवीदानसमारोहः, द्वयोः भवनयोः शिलान्यासश्च




द्वादशपदवीदानसमारम्भे मञ्चस्थाः मान्याः कुलाधिपतयः गुजरातस्य राज्यपालमहोदयाः, कुलपतयः इतरे च महानुभावाः

१८/२/२०२०तमे दिनाङ्के प्रातः ११:०० वादने श्रीसोमनाथसंस्कृतविश्वविद्यालये द्वादशः पदवीदानसमारोहः सम्पन्नः। विश्वविद्यालयेन आयोजिते समारोहे अस्मिन् गुजरातराज्यस्य माननीयाः राज्यपालमहोदयाः तथा श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलाधिपतयः श्रीआचार्य-देवव्रत-महोदयाः सभाध्यक्षत्वेन समुपस्थिताः आसन्। गुजरातराज्यस्य शिक्षणमन्त्रिणः माननीयाः श्रीभूपेन्द्रसिंहचुडासमामहोदयाः विशिष्टातिथिपदे विराजमानाः आसन्। डॉ. हरिसिंह गौर सागर विश्वविद्यालयस्य माननीयाः कुलपतयः प्रो. बलवन्त जानीमहोदयाः सारस्वतातिथित्वेन अत्र सम्प्राप्ताः आसन्। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रो. गोपबन्धु मिश्रमहोदयाः अत्र स्वागतकर्तारः आसन्।

कार्यक्रमेऽस्मिन् माननीयेन कुलाधिपतिना आचार्यदेवव्रतमहोदयेन स्नातकैः सङ्कल्पमन्त्राः प्रतिज्ञा च उच्चारिता, एतेषां पालनं कुर्वन्तः स्नातकाः जीवने साफल्यं प्राप्नुयुः इति कामना च प्रकटीकृता। कार्यक्रमेऽस्मिन् ८७० विद्यार्थिनः पदकानि पदव्यः च प्राप्नुवन्। कुलाधिपतिः सर्वान् अपि स्नातकान् अभ्यनन्दत्। कार्यक्रमेऽस्मिन् विश्वविद्यालयेन पञ्च प्रकाशनानि लोकाय अर्पितानि।








कुलाधिपतिना स्वीयभाषणे उक्तं यत् अस्मिन् विश्वविद्यालये अधीयानैः विद्यार्थिभिः गाम्भीरैः भूत्वा सन्निष्ठसमाजस्य निर्माणं कर्तव्यम्। विश्वस्य प्राचीनतमा भाषा संस्कृतम् अस्ति। विश्वस्य प्राचीनतमः ग्रन्थः ऋग्वेदः अस्ति। वेदाः अपौरुषेयाः सन्ति। भारतीयमानवस्य जीवनस्य सम्पूर्णा दिनचर्या संस्कृतशास्त्रेषु निहिता वर्तते। मनुष्येषु मानवताजागरणस्य क्षमता केवलं संस्कृते अस्ति। बन्धुभावप्रसारकः देशः भारतम् एव। ६००तमे ईशवीये ह्वेन सेंगः नामकः चीनदेशीयः यात्रिकः द्वादश वर्षाणि यावत् महाराजस्य हर्षवर्धनस्य राज्ये अवसत्। ह्युएन् सेंग वर्यः भारते वर्तमानायाः समृद्धेः, कन्यासाक्षरतायाः, युवधनस्य च विस्तृतं वर्णनम् अकरोत्। ह्युएन् सेंग यदा समुद्रमार्गेण प्रत्यावर्तते स्म तदा समुद्रे झञ्झावातः आयातः। स्वस्य संरक्षणाय ह्युएन् सेंगः संस्कृतग्रन्थानां समुद्रे क्षेपणस्य निर्णयम् अकरोत्। तदानीं नौकायां वर्तमानौ द्वौ शिक्षकौ त्यागराजः ज्ञानगुप्तः च स्वात्मानौ समुद्रे क्षिप्त्वा संस्कृतग्रन्थान् रक्षितवन्तौ। एतस्य प्रसङ्गस्य अपि उल्लेखं ह्युएन सेंगः अकरोत्। विश्वविद्यालयस्य भारतीय-संस्कृतेः प्रचारप्रसारकार्याय कुलाधिपतिः विश्वविद्यालयम् अभ्यनन्दत्। संस्कृतभाषा अस्मान् अस्मन्मूलैः सह संयोक्तुं क्षमा वर्तते। भाषाविज्ञानदृष्ट्या श्रेष्ठायाः भाषायाः सर्वे गुणाः संस्कृतमाश्रयन्ते। तस्मात् अवश्यम् एव इयं भाषा सर्वात्मना रक्षणीया, प्रसारणीया प्रयोक्तव्या चेति सः अवादीत्।

समारोहे विशिष्टातिथित्वेन उपस्थितः शिक्षणमन्त्री श्रीभूपेन्द्रसिंहचूडासमा- महोदयः अवदत् यत् लोकतन्त्रस्य दुरुपयोगं यः वारयितुं क्षमः स्यात् तादृशस्य समाजस्य निर्माणस्य भारः विश्वविद्यालयस्य उपरि वर्तते। गुजरातसर्वकारः अस्य विश्वविद्यालयस्य सर्वाङ्गविकासाय कटिबद्धः वर्तते। तदर्थम् अपेक्षितं सर्वविधं साहाय्यं च कर्तुम् उत्सुकः वर्तते। विश्वविद्यालयस्य संस्कृतविकासे कार्यं श्लाघित्वा सर्वान् अपि विश्वविद्यालयस्य कर्मचारिणः सः अभ्यनन्दत्।

कार्यक्रमस्य सारस्वतातिथिः प्रो. बलवन्त जानी महोदयः भगवतः श्रीस्वामिनारायणस्य शिक्षापत्रीग्रन्थस्य उल्लेखपुरःसरं विश्वविद्यालयस्य विकासयात्राम् अवर्णयत्। नेश्नल मेन्युस्क्रिप्ट मिशन् इत्यस्याः संस्थायाः प्रतिवेदनस्य आधारेण तेन उक्तं यत् केवलं गुजरातराज्ये सम्प्रति प्रायः अष्टादशलक्षसंख्याकाः ताडग्रन्थाः विद्यन्ते। सर्वेषां शास्त्राणां विषयाणां च ज्ञानं केवलं संस्कृते एव उपलभ्यते इति तेन सगौरवम् उक्तम्।

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः अस्मिन् प्रसङ्गे मञ्चासीनानां महानुभावानां परिचयम् अकारयत्। गते वर्षात्मके अवधौ विश्वविद्यालयस्य उपलब्धीः वर्णयित्वा सः सर्वकारपक्षतः प्राप्यमाणस्य साहाय्यस्य उल्लेखम् अकरोत्। ततश्च तेन सर्वैः विद्यार्थिभिः संस्कृतेन प्रतिज्ञा कारिता। पदवीदानसमारोहेऽस्मिन् १७ सुवर्णपदकानि, ४ रजतपदकानि ४ वित्तीयाः पुरस्काराः च, इत्थम् आहत्य २५ पुरस्काराः वितीर्णाः।

विश्वविद्यालये सम्प्रति द्वे भवने निर्मीयमाणे स्तः। तत्र एकं 'बृहस्पतिः' इत्याख्यस्य विशालस्य सम्पन्नस्य च ग्रन्थालयस्य भवनं, द्वितीयं 'श्रीः' इत्याख्यस्य सर्वसुविधासम्पन्नस्य अतिथिगृहस्य भवनम्। अस्यैव कार्यक्रमस्य अङ्गतया विश्वविद्यालये निर्मीयमाणयोः द्वयोः भवनयोः शिलान्यासः अपि महानुभावानां करकमलाभ्यां सम्पन्नः।





## "भारतीय संस्कृति एवं हमारी जीवनशैली" इति विषये समायोजितः वेबिनारकार्यक्रमः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ०९.०५.२०२० तमे दिनाङ्के प्रातः एकादशवादने "भारतीय संस्कृति एवं हमारी जीवनशैली" इति विषये गुजरातराज्य मान्यस्य राज्यपालमहोदयस्य एवं च श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलाधिपतेः श्रीमतः आचार्य देवव्रतमहोदस्य आध्यक्ष्ये एकः वेबिनारकार्यक्रमः समायोजितः आसीत्। अस्मिन् वेबिनारकार्यक्रमे मुख्यातिथिरूपेण माननीयः शिक्षणमन्त्री श्रीभूपेन्द्रसिंहचूडासमावर्यः, विशेषातिथिरूपेण माननीया प्राथमिकशिक्षणमन्त्रिमहोदया श्रीमती विभावरीबेन दवेवर्या, शिक्षणविभागस्य प्रधानसचिववर्या श्रीमती अञ्जुशर्मवर्या च उपस्थिताः आसन्। कार्यक्रमारम्भे कुलपतिः प्रो. गोपबन्धुमिश्रः सर्वेषां महानुभावानां वाचिकं स्वागतं विहितवान्।

अस्मिन् वेबिनारकार्यक्रमे सारस्वतातिथिरूपेण प्रसिद्धः लेखकः शिक्षणवित् डॉ. भद्रायु वच्छराजानी "भारतीय संस्कृति एवं हमारी जीवनशैली" इति विषये स्वकीयं विशिष्टं वक्तव्यं प्रास्तौत्। तदनु मान्यः कुलाधिपतिमहोदयः प्रासङ्गिकम् उद्बोधनं प्रदत्तवान्। अस्मिन् कार्यक्रमे अष्टादशशताधिकैः जनैः पञ्जीकरणं कृत्वा अन्तर्जालमाध्यमेन भागग्रहणं कृतमासीत् तथा च अस्य वेबिनारकार्यक्रमस्य फेसबुकमाध्यमेन लाइवप्रसारणम् अपि प्रायः षट्-सहस्रं जनाः दृष्टवन्तः। अस्य कार्यक्रमस्य मार्गनिर्देशनं डॉ. दशरथजादववर्येण, सञ्चालनं प्राचार्येण डॉ. नरेन्द्रकुमार-पण्ड्या-वर्येण च कृतम्। संयोजने ग्रन्थपालः रविन्द्रकाले एवं च हरेशः खेर साहाय्यं कृतवन्तौ।




माननीयः राज्यपालः महोदयः



अग्रसचिववर्या श्रीमती अञ्जुशर्मवर्या




डॉ. भद्रायु वच्छराजानी




शिक्षणमन्त्री श्री भूपेन्द्रसिंह चूडासमावर्यः

## महर्षि-महेश-योगि-संस्थायाः प्रमुखस्य विश्वविद्यालय-प्रवासः



श्री माइकेल बुश महोदयः

०९.०३.२०२० इत्यस्मिन् दिनाङ्के माइकेल बुश महोदयः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्रवासम् अकरोत्। माइकेल बुश महोदयः महर्षि-आन्दोलनस्य ब्रह्मदेशः, मारेशस तथा न्यूझिलेंड इत्येतेषां त्रयाणां देशानां राजा (राष्ट्रियः नेता) तथा महर्षि-महेश-योगि-प्रतिष्ठानस्य वैदिकभारतप्रकल्पस्य अन्ताराष्ट्रियः नेता वर्तते। महोदयोऽयं महर्षि-महेश-योगि-संस्थायाः अन्यतमेन अनुयायिना श्रीगिरीश जानीमहोदयेन सह प्रातः सर्वादौ कुलपतिकार्यालये सम्प्राप्तः। ततश्च तेन विश्वविद्यालयस्य यज्ञशालायां प्रवर्तमानः वैदिकयज्ञः विलोकितः। ततः परं तेन विश्वविद्यालयस्य सभागारे प्रवर्तमानायां नित्यप्रार्थनायां भागः ऊढः। ततः परं तेन विश्वविद्यालयस्य अधिकारिभिः सह परिसरावलोकनं कृतम्। मध्याह्ने प्राशासनिकभवनस्य सङ्गोष्ठीकक्षे सर्वेषाम् आचार्याणां पुरतः डॉ. दीपेश कतिरा महोदयः विश्वविद्यालयस्य विषये आङ्ग्लभाषया सन्दर्शनं प्रास्तौत्। अनुमध्याह्नं माइकेल बुश महोदयेन अपि स्वीयसंस्थायाः संस्कृताभिमुखानां प्रकल्पानां परिचयः कारितः। एतस्य प्रवासस्य अन्ते सायंकाले बुशमहोदयः कुलपतिकार्यालये कुलपतिकुलसचिवाभ्यां सह विशिष्टां चर्चाम् अकरोत्। प्रवासान्ते महोदयोऽयं विश्वविद्यालयस्य अध्यापनशैल्या कार्यशैल्या च अतीव प्रभावितः आसीत्।

# "भाष्यपरम्परा ज्ञानप्रवाहश्च" इति विषये समायोजितः अन्ताराष्ट्रियः परिसंवादः



अन्ताराष्ट्रियपरिसंवादस्य उद्घाटनकार्यक्रमस्य एकं दृश्यम्

'परिसंवादः' आबहोः कालात् सततं विकसमानायाः भारतीयायाः भाष्यपरम्परायाः ज्ञानप्रवाहस्य च किञ्चिद् आधारभूतं तत्त्वम्। 'भाष्यपरम्परा ज्ञानप्रवाहश्च' (Tradition of Commentaries and the Dynamics of Knowledge) इत्यस्मिन् विषये श्रीसोमनाथसंस्कृतविश्वविद्यालये ११ तः १३ फरवरी २०२० यावत् अन्ताराष्ट्रियः परिसंवादः समायोजितः। २०१८ तमे वर्षे जर्मनीस्थितेन हैडल्बर्ग-विश्वविद्यालयेन समं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षिकः अनुबन्धः (MoU) जातः। ततः ११.३.२०१९ तमे दिनाङ्के हैडल्बर्गस्थस्य प्राध्यापकस्य डॉ. आनन्दमिश्रमहाभागस्य विशिष्टोपस्थितौ कुलपतिभिः विश्वविद्यालये अन्ताराष्ट्रिय-परिसंवादायोजनविषये सङ्कल्पितम्। तदनु अस्य परिसंवादस्य कृते प्रो. पाण्डेयमहोदयः अन्ताराष्ट्रियपरिसंवादस्य मुख्यसंयोजकत्वेन, डॉ. जानकीशरण आचार्यः, डॉ. दीपेश विनोद कतिरा च संयोजकत्वेन नियुक्तौ। परिसंवादे सुष्ठु शैक्षिकदिङ्निर्देशनाय भारतस्य मूर्धन्यैः विद्वद्भिः युता परामर्शकसमितिः, परिसंवादस्य निर्विघ्नसञ्चालनाय च आयोजनसमितिः रचिता। तत्र प्रो. उमाशङ्कर शर्मा 'ऋषिः', प्रो. पङ्कज जानी, प्रो. राजाराम शुक्लः, प्रो. श्रीनिवास वरखेडी, महामहोपाध्यायः स्वामी भद्रेशदासः, प्रो. जयप्रकाशनारायण द्विवेदी, प्रो. मयूरीबेन भाटिया, डॉ. कश्यप त्रिवेदी, डॉ. श्वेता जेजुरकर च परिसंवादस्य परामर्शकत्वम् अङ्गीकृत्य अनुगृहीतवन्तः।

११.२.२०२०तमे दिनाङ्के मङ्गले मङ्गलवासरे चिरप्रतीक्षितः परिसंवादः समारभत। प्रातः १०:०० वादने उद्घाटनकार्यक्रमाय विश्वविद्यालयस्य शैक्षणिकभवनस्य सभागारः प्रतिभागिभिः परिपूर्णः आसीत्। प्रो. उमाशङ्कर शर्ममहोदयाः अस्वास्थ्यात् परिसंवादे समुपस्थाय स्वीयं बीजभाषणं प्रस्तोतुं नाशक्नुवन्। तैः टङ्कितान् अंशान् स्वीयैः विचारैः समं प्रो. कमलेशदत्त त्रिपाठिगुरवः उद्घाटनकार्यक्रमे बीजभाषणकर्तृत्वेन प्रास्तुवन्। उद्घाटनकार्यक्रमे विडिओक्लिपिंग-द्वारा प्रेक्षकैः आयोजकैः च पूज्य- गुरुशरणानन्दस्वामिपादानाम् आशिषः प्राप्ताः। गरिममयस्य उद्घाटनकार्यक्रमस्य अङ्गतया श्रीसोमनाथविश्वविद्यालयस्य तत्संलग्नानां महाविद्यालयानां च विशिष्टानां कर्मचारिणां सम्माननमपि जातम्। अत्रैव परिसंवादे प्रस्तुत्यर्थं चितानां शोधसाराणां सङ्ग्रहस्य 'भाष्यावास्यम्' इति नाम्ना प्रकाशतां गतस्य पुस्तकस्य लोकाय अर्पणम् अपि जातम्।

ततः प्रारब्धः 'भाष्यपरम्परा ज्ञानप्रवाहश्च' इत्यमुं विषयमाश्रित्य दिनत्रयव्यापी परिसंवादः। फरवरीमासस्य ११, १२, १३ दिनाङ्केषु प्रत्यहं प्रातः १०:०० वादनतः सायः ४:०० वादनं यावत् शैक्षणिकभवने स्थानद्वये परिसंवादोऽयं प्रावर्तत। गुर्जरधरायामेव लब्धजन्मानः महामहोपाध्यायाः भद्रेशदासस्वामिपादाः अधुनिकभाष्यकारत्वेन निखिले संसारे ख्यातिमवाप्नुवन्। अतः विशिष्य स्वामिनारायणभाष्यमेवाश्रित्य सत्रद्वयमायोजितमासीत्। अस्मिन्नवधौ प्रत्यहं सामूहिकं विशिष्टव्याख्यानसत्रमपि भवति स्म। एकादशे दिनाङ्के सद्यः पद्मश्रीपुरस्कारेण समलङ्कृतानां प्रो. अभिराजराजेन्द्रमिश्रमहाभागानां 'संस्कृतभाष्यपरम्परा ज्ञानप्रवाहश्च' इति विषये विशिष्टं व्याख्यानमासीत्। द्वादशे दिनाङ्के कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य यशस्विनां कुलपतीनां विशिष्टानां न्यायशास्त्रविदुषां प्रो. श्रीनिवासवरखेडीमहाभागानां 'पञ्चिकाप्रपञ्चः' इति विषये व्याख्यानमासीत्। त्रयोदशे च दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिचराणां राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरस्य प्राचार्याणां लब्धप्रतिष्ठानां व्याकरणशास्त्रविदुषां प्रो. अर्कनाथचौधरीमहाभागानां 'महाभाष्ये विभाषापदार्थः' इति विषये विशिष्टं व्याख्यानं कल्पितमासीत्। एषु त्रिषु दिनेषु व्याकरण-न्याय-वेदान्त-साहित्य-काव्यशास्त्र-तन्त्र-वेदादिनैकेषु शास्त्रेषु रचितानां विशिष्टानां भाष्य-टीका-उपटीकानां विषये विद्वत्तापूर्णानां शोधपत्राणां प्रस्तुतिः जाता।

एकादशे दिनाङ्के सायं ४:३०वादनात् प्रभृति विशिष्टायाः अष्टावधानकलायाः प्रदर्शनमासीत्। तत्र सुदूरात् केरलप्रदेशात् समागतः युवा विद्वान् डॉ. रामकृष्णपेजत्तायवर्यः अवधानित्वेन स्वीयया स्मृत्या आशुकवित्वप्रतिभया च सर्वेषां मनांसि आह्लादितवान्। द्वादशे दिनाङ्के सायं ४:३० वादनात् प्रभृति प्रो. परमानन्दशास्त्रिणां पुण्यस्मृतौ विशिष्टं कविसम्मेलनमायोजितमासीत्। कविसम्मेलनेऽस्मिन् प्रो. अभिराजराजेन्द्रमिश्रप्रभृतयः प्रथितयशस्काः संस्कृतकवयः स्वीयैः सद्योरचितैः काव्यैः सहृदयेभ्यः ब्रह्मानन्दतुल्यमानन्दं प्राददुः।

परिसंवादस्य समापनकार्यक्रमे प्रो. अर्कनाथचौधरीमहाभागाः मुख्यातिथित्वम् अवहन्। कार्यक्रमेऽस्मिन् कुलसचिवाः डॉ. दशरथ जादव महोदयाः परिसंवादायोजने, सञ्चालने च येषां सहभागः आसीत् तान् सर्वान् प्रति कृतज्ञतां प्राकटयन्। १४.२.२०२० दिनाङ्के समागतेषु अभ्यागतेषु ये परिभ्रमणमैच्छन् तेषां कृते गीर-अरण्यादीषु स्थानेषु अटनस्य व्यवस्थामपि अकल्पयत् विश्वविद्यालयः। इत्थं विश्वविद्यालयकुटुम्बस्य सर्वेषां सदस्यानां साहाय्येन प्रो. देवेन्द्रनाथपाण्डेयवर्यस्य मुख्यसंयोजकत्वे, डॉ. दीपेश विनोद कतिरा तथा च डॉ. जानकीशरण आचार्यस्य संयोजकत्वे, दीर्घदृष्टिभिः अस्मद्विश्वविद्यालयस्य कुलपतिभिः, डॉ. आनन्दमिश्रवर्यैः च प्रागेव यथा कल्पितं तथा गुणवत्तापूर्णः परिसंवादः समायोजितः।









## श्रीमद्भागवतमहापुराण-व्याख्यानमाला


डॉ. नरेन्द्रकुमार पण्ड्या

श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा कुलपतिवर्याणां प्रो. श्री गोपबन्धुमिश्रमहोदयानां प्रेरणया मार्गदर्शनेन च तथा कुलसचिवस्य डॉ. दशरथजादववर्यस्य प्रबन्धनव्यवस्थापूर्णेन सहकारेण कोविड-१९ महारोगसंक्रान्ते काले ऑनलाईन विश्वविद्यालय-फेसबुक-पेज-द्वारा सर्वजनहिताय सर्वजनसुखाय तथा कोरोना इति रोगविशेषकारणेन मृतानां शान्त्यै अन्येषां ज्ञानाय च श्रीमद्भागवतमहापुराणस्य व्याख्यानमालाकार्यक्रमविशेषस्य आयोजनं दिनाङ्कः ०९/०५/२०२० तः २०/०५/२०२० यावत् डॉ. श्रीनरेन्द्रकुमार एल. पण्ड्यामहोदयानां (प्राचार्याः, श्रीसोमनाथसंस्कृतविश्वविद्यालयसञ्चालित-संस्कृतकॉलेज, वेरावलम्) व्यासासने व्याख्यानमालासत्रं सञ्जातम्। तत्र तैः पूज्यचरणैः द्वादश दिनानि यावत् प्रतिदिनं सायं ०५:०० तः ०६:०० वादनं यावत् श्रीमद्भागवतमहापुराणस्य विशिष्टं व्याख्यानं सर्वजनकल्याणाय विहितम्। फेसबुकमाध्यमेन ये शृण्वन्ति स्म तेषां प्रतिसादोऽपि सम्प्राप्तः विश्वविद्यालयस्य अभूतपूर्वं सत्कार्यमिदं सत्कर्मेदं जनैः सभाजितम्। पूज्यैः कुलपतिपादैः स्वमनोभावाः प्रसन्नताश्च प्रकटिताः। कुलसचिवमहोदयेनापि विश्वविद्यालयस्य गौरवपूर्णं कार्यमिदं प्रशंसितम्। उत्तरोत्तरम् एतादृश्याः व्याख्यानमालाः भवितव्याः इति जनैः स्वमोदः प्रमोदः वाग्भिः प्रकटितः। समग्रायाः व्याख्यानमालायाः सफलायोजनाय सर्वैः विश्वविद्यालयपदाधिकारिभिः महानुभावैः मार्गदर्शनं कृतम्, सङ्गणकतज्ज्ञैः श्रीहरेशभाई खेर एवं श्रीसन्दीप जोषीमहोदयेन साहाय्यं कृतं तथा च व्याख्यानमालायाः सञ्चालनं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पुराणसङ्कायाध्यक्षेण डॉ. पङ्ककुमार एस. रावलमहोदयेन कृतम्। विशेषतश्च अस्याः व्याख्यानमालायाः उद्घाटनप्रसङ्गे विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः अध्यक्षीयं प्रवचनं प्रस्तुतवान् एवं च समापनकार्यक्रमे श्रीभागवतविद्यापीठस्य परमाध्यक्षः श्रीभागवगऋषिशास्त्री महोदयः अध्यक्षीयं प्रवचनं प्रस्तुतवान्।

## वाक्यार्थपरिषद्-२०१९-२०

श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रतिवर्षं शास्त्रज्ञानसंवर्धनाय छात्रेषु च शास्त्रज्ञानसङ्क्रमणाय वाक्यार्थपरिषदः आयोजनं विधियते। यत्र नैकशास्त्रनिपुणाः प्राध्यापकाः स्वशास्त्रानुसारं वाक्यार्थविचारम् उपस्थापयन्ति। ऐषमः वाक्यार्थपरिषदः उद्घाटनसत्रसमन्वितस्य प्रथमाधिवेशनस्य आयोजनं १९.१२.२०१९ दिनाङ्के मान्यस्य कुलपतेः प्रो. गोपबन्धुमिश्रवर्यस्य आध्यक्ष्ये अभूत्। अस्मिन् शैक्षणिकवर्षे वाक्यार्थपरिषदः संयोजकरूपेण दर्शनविभागस्य प्राध्यापकः डॉ. जानकीशरण आचार्यः, शारीरिकशिक्षणविभागस्य प्राध्यापकः डॉ. जयेशकुमार मुङ्गरा च कार्यम् अकुरुताम्। अस्मिन् वर्षे आयोजितानां वाक्यार्थपरिषदः अधिवेशनानां विवरणम् अधः प्रदीयते –

| क्रमः | दिनाङ्कः | अधिवेशनस्य अध्यक्षः | वक्तारः विषयाश्च |
|---|---|---|---|
| १ | १९.१२.२०१९<br>प्रथमाधिवेशनं च | प्रो. गोपबन्धुमिश्रः | प्रो. गोपबन्धुमिश्रः - कृत्प्रत्ययानां विश्लेषणम्<br>प्रो. विनोद कुमार झा - समासादिवृत्तिविमर्शः |
| २ | ०२.०१.२०२०<br>द्वितीयाधिवेशनम् | प्रो. विनोद कुमार झा | डॉ. बी. उमा महेश्वरी - कर्णभेरीभग्नन्यायः<br>श्री नित्यानन्द ओझा - ज्योतिषशास्त्रे जीवनवृत्तिविचारः<br>डॉ. कार्तिक कुमार पण्ड्या - Administration of Justice in the Arthaśāstra of Kauṭilya |
| ३ | २३.०१.२०२०<br>तृतीयाधिवेशनम् | प्रो. देवेन्द्रनाथ पाण्डेयः | डॉ. नरेन्द्रकुमार एल्. पण्ड्या - शिशुपालवधे द्वितीयसर्गे अलङ्कारप्रयोजना<br>डॉ. जानकीशरण आचार्यः - देवा विग्रहोपेताः ?<br>श्रीरवीन्द्र एस्. काले - Academic Ethics and UGC CARE List : An Overview |
| ४ | ०६.०२.२०२०<br>चतुर्थाधिवेशनम् | प्रो. महेन्द्रकुमार दवे | प्रो. महेन्द्रकुमार ए. दवे - कालिदासस्य मेघदूते नायिकानिरूपणम्<br>डॉ. पङ्कजकुमार रावलः - श्रीमद्भगवद्गीतायां गुरु-शिष्ययोः भूमिका<br>डॉ. जयेशकुमार मुंगरा - प्रकृति प्रदत्त आठ चिकित्सक<br>सुश्री दृष्टि बारैया - ફેફસાને લગતા રોગો અને યૌગિક ચિકિત્સા |
| ५ | २८.०२.२०२०<br>पञ्चमाधिवेशनम् | प्रि. डॉ. नरेन्द्रकुमार पण्ड्या | डॉ. शत्रुघ्न पाणिग्राही - शुक्लयजुर्वेदीयशान्तिमन्त्रेषु पर्यावरणचिन्तनम्<br>डॉ. डी. एम्. मोकरिया - विक्रमोर्वशीये मानवगौरवम्<br>डॉ. रमेशचन्द्र शुक्लः - ज्योतिषवास्तुसम्मतगृहद्वारविचारः |
| ६ | १२.०२.२०२०<br>षष्ठाधिवेशनम्<br>समापनसमारोहश्च | प्रो. गोपबन्धु मिश्रः | प्रो. देवेन्द्रनाथ पाण्डेयः - माध्यन्दिन-संहितायाम् इष्टकानिर्माणतकनीकी<br>डॉ. दीपेश विनोद कतिरा - "जिघृक्षति" इति रूपस्य प्रक्रियायाः विमर्शः<br>डॉ. तनुजा - रुरुदिव/रुरुदिम, रुदिवः/रुदिमः किमत्र योग्यं प्रत्युदाहरणम्<br>श्रीजिगरभट्टः - रसगङ्गाधरानुसारं रसाभासनिरूपणम् |

१२.०२.२०२० तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षणिकसभागारे ऐषमः आयोजितायाः वाक्यार्थपरिषदः समापनसत्रम् अभूत् यत्र अध्यक्षरूपेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः उपस्थितः आसीत्। अस्मिन् समापनकार्यक्रमे सर्वेभ्यः वक्तृभ्यः कुलपतिहस्ताभ्यां प्रमाणपत्राणि प्रदत्तानि।

## अभिनवकविसम्मेलनम्



स्वकाव्यं प्रस्तुवन् श्री भाग्येश झा महोदयः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन कोविड-१९ महारोगसमयेऽपि संस्कृत-भाषायाः प्रचाराय प्रसाराय च काव्यक्षेत्रे छात्राणां प्रवेशाय सर्वकारस्य नियमानुसारं एकस्याभिनवकविसम्मेलनस्य आयोजनं कृतम्। सम्मेलनमिदं श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य वेबेक्ष (webex) फेसबुकमाध्यमेन च जीवत्प्रसारितम् आसीत्। अभिनव-कविसम्मेलनमिदं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयानां पूज्यानां कुलपति-वर्याणां प्रो. श्रीगोपबन्धुमिश्रमहोदयानां प्रेरणया तथा डॉ. श्रीदशरथजादवजी कुलसचिव-वर्याणां प्रबन्धनमार्गदर्शनेन दिनाङ्क-३०/०५/२०२० शनिवासरे प्रातः ११-०० तः ०१-०० वादनं यावत् जातम्। अत्र कविसम्मेलने तत्रभवन्तो भवन्तः मान्याः साहित्यकाराः श्रीभाग्येश-ज्हा-महोदयाः अस्य कविसम्मेलनस्य अध्यक्षपदे समुपस्थिताः आसन्। तथा च अन्ये कवयः स्वकाव्यपाठेन संस्कृतभाषायाः सौन्दर्यं प्रस्तुतवन्तः। कविभिः साम्प्रतसमयानुसारं कोरोनाविषाणु-महारोगकाले जनानां मानसिकतां परिस्थितिं च परीक्ष्य स्वकाव्यपाठः कृतः। केचन कवयः भगवद्गुणानुवादं गुरोः शास्त्रस्य च महिमानं प्रकटितवन्तः स्वकाव्यकुसुमैः। विश्वविद्यालयस्य फेसबुक-पेजमाध्यमेन ये द्रष्टारः श्रोतारश्चासन्, तैः काव्यानन्दप्रतिभावाः प्रदत्ताः। अभिनवकविसम्मेलनेऽस्मिन् काव्यपाठपरायणाः कवयः इमे आसन्- (१) डॉ. नरेन्द्रकुमार एल. पण्ड्या, (प्राचार्याः, श्रीसोमनाथसंस्कृत-विश्वविद्यालयसञ्चालित-संस्कृतकॉलेज, वेरावलम्), (२) डॉ. अमृतलाल जी. भोगायता (प्राचार्याः, श्रीब्रह्मर्षिसंस्कारधाम, नडियाद), (३) डॉ. रविन्द्रकुमार खाण्डवाला (प्राध्यापकाः, एच. के आर्ट्स कॉलेज, कर्णावती), (४) डॉ. भावप्रकाश एम. गान्धी (प्राध्यापकाः, सरकारी विनयन कॉलेज, गाम्भोई), (५) डॉ. प्रीतिः पूजाराजी (विरमगाम कॉलेज), (६) श्री जिगरभट्टः(अनुस्नातकविभागः,श्रीसोमनाथ संस्कृत विश्वविद्यालयः), (७) डॉ. मतङ्ग एम. गोस्वामी (कविसम्मेलने, विदेशात् संलग्नः), (८) श्री सहदेव जोषी, (शिक्षाशास्त्रिच्छात्रः, शिक्षाशास्त्री महाविद्यालयः, सोला, कर्णावती), (९) श्री सौरभः भट्टः (श्रीवरतन्तुसंस्कृतमहाविद्यालयीयच्छात्रः, सोला, कर्णावती), (१०) श्री ऋषभः देरासरी, (श्रीसोमनाथसंस्कृतविश्वविद्यालयः, अनुस्नातकविभागस्य छात्रः)। कविसम्मेलने सर्वैः कविभिः ऑनलाईनद्वारा काव्यपाठः श्रावितः। कविसम्मेलनस्यास्याभिनवप्रयोगेण जनरञ्जनाय अन्येभ्यः नवकविभ्यः सम्मेलनमिदं मार्गदर्शनरूपं जातम्। कविभिः काव्यानि श्रावितानि। सम्मेलनान्ते कविसम्मेलनाध्यक्षेण श्रीभाग्येश झामहोदयेन स्वकाव्यपाठः कृतः अध्यक्षीयं व्याख्यानं च प्रस्तुतम्। प्रो. गोपबन्धुमिश्रमहोदयैः कुलपतिभिः स्वहृद्गतभावाः प्रकटिताः, सम्मेलनमिदं सभाजितञ्च। डॉ. श्रीदशरथजादवमहोदयेनापि आभारविधिना स्वप्रसन्नता प्रतिपादिता। अभिनवकविसम्मेलनस्य संयोजकत्वेन कार्यक्रमस्य सञ्चालकत्वेन च डॉ. पङ्कजकुमार एस. रावलमहोदयेन प्रदत्तमुत्तरदायित्वं सम्पादितम्। कार्यक्रमेऽस्मिन् सङ्गणकतज्ज्ञैः महानुभावैः स्वसहकारः प्रदत्तः तेन च सफलतया अभिनवकविसम्मेलनमिदं पूर्णतां गतम्।

## कोरोना-१९ महामारीसमये श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य सेवाकार्यम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन कोरोना-१९ महामारीसमये विविधरूपेण सेवाकार्याणि सम्पादितानि। माननीयप्रधानमन्त्रिणा २४.०३.२०२० तः समग्रभारते गमनागमनप्रतिरोधः (लॉकडाउम) उद्घोषितः आसीत्। एतादृश्यां स्थित्यां श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्रावासे गुजरातेतरराज्यानां प्रायः ४२ छात्राः गृहं गन्तुं न शक्तवन्तः, अतः तेषां पारिवारिकसदस्यवत् अवधानं विश्वविद्यालयेन कृतम्। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्राध्यापकाः प्रतिदिनं छात्रावासे गत्वा छात्रैः सह सकारात्मकसंवादं कृत्वा तेषां मनःस्थितिः एतादृश्यां स्थित्यामपि स्वस्था भवेत् एतदर्थं मार्गदर्शनं प्रदत्तवन्तः। अपि च श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षणिककर्मचारिणः शिक्षणेतरकर्मचारिणश्च मिलित्वा एकस्य दिनस्य वेतनं (१,२१,३११ रूप्यकाणि) PM CARE Fund मध्ये दत्तवन्तः। श्रीसोमनाथ-संस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धु मिश्रः अपि व्यक्तिगतरूपेण PM CARE Fund मध्ये द्विलक्षरूप्यकाणि (२,००,००० रूप्यकाणि) प्रदत्तवान्। श्रीसोमनाथसंस्कृतविश्वविद्यालये कार्यं कुर्वतां चतुर्थश्रेणीकर्मचारिणां, स्वच्छताकर्मचारिणां, चालकानां च साहाय्यार्थम् अपि विश्वविद्यालयस्य प्राध्यापकाः शिक्षणेतरकर्मचारिणश्च धनसंग्रहणं कृतवन्तः। एतेन संगृहीतधनेन चतुर्थश्रेणीकर्मचारिणां, स्वच्छताकर्मचारिणां, चालकानां च कृते आवश्यकभोज्यसामग्र्याः कुलपतिकुलसचिवाभ्यां वितरणं कृतम्।





कर्मचारिभ्यः आवश्यकवस्तुवितरणं कुर्वाणौ कुलपतिः प्रो. गोपबन्धुमिश्रः कुलसचिवः च डॉ. दशरथ जादवमहोदयः



## अनुस्नातकविभागाध्यक्षरूपेण नियुक्तः डॉ. ललितकुमार पटेलः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षरूपेण १६.०६.२०२० तमे दिनाङ्के साहित्यविभागे सहाचार्यरूपेण कार्यरतः डॉ. ललितकुमार पटेलः नियुक्तः अभूत्। डॉ. पटेलवर्याय असुं कार्यभारं प्रो. अर्चनाकुमारी दुबे स्वस्याः अनुस्नातकविभागाध्यक्षारूपेण कार्यकालसमाप्तौ सत्यां प्रदत्तवती। अस्मिन् अवसरे विश्वविद्यालयसञ्चालित-संस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्यावर्यः अपि उपस्थितः आसीत्।



प्रो. रमेशकुमार पाण्डेयः



डॉ. अमृतलाल भोगायता

## संस्कृतकविपरिचयव्याख्यानमाला

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन फेसबुकलाइवप्रसारणे संस्कृतकविपरिचय-व्याख्यान-मालायाः आयोजनं दिनाङ्कः २१.०५.२०२० तः ०३.०६.२०२० पर्यन्तं कृतम्। अस्यां व्याख्यानमालायां - (१) कविबाणभट्टविषये डॉ. अमृतलाल भोगायता, प्राचार्यः श्रीब्रह्मर्षि-संस्कृतमहाविद्यालयः, नडियाद, (२) कविभारविविषये डॉ. भावप्रकाश गान्धी, आसि.प्रोफेसर एवं संस्कृतविभागाध्यक्षः, सरकारीविनयन एवं वाणिज्य-कॉलेज, गाम्भोई, (३) कविश्रीहर्षविषये डॉ. रवीन्द्रकुमार खाण्डवाला, एसो. प्रोफेसर एवं संस्कृतप्राकृतविभागाध्यक्षः, श्रीएच.के.आर्ट्स कॉलेज, अहमदाबाद, (४) कविभवभूतिविषये डॉ. पङ्कजकुमार ठाकरः आसि. प्रोफेसर, संस्कृतविभाग, क्रान्तिवीरश्यामजीकृष्णवर्मा कच्छविश्वविद्यालयः, भुज, (५) ममटाचार्यविषये डॉ. अनिलद्विवेदी, प्राध्यापकः, भवन्स ए.के.दोशी महिला कॉलेज, जामनगरम्, (६) कविभासविषये प्रो. रमाकान्त पाण्डेयः, आचार्यः, साहित्यविभागः, केन्द्रियसंस्कृत-विश्वविद्यालयः, जयपुरपरिसरः, (७) कविकालिदासविषये प्रो. मनुलता शर्मा, आचार्या, संस्कृतविभागः, कलासङ्कायः, काशीहिन्दूविश्वविद्यालयः, वाराणसी, (८) कविजगन्नाथविषये प्रो. शिवराम शर्मा, आचार्यः – संस्कृतविद्याधर्मविज्ञानसङ्कायः, काशीहिन्दूविश्वविद्यालयः, वाराणसी, (९) कविमाघविषये प्रो. भागीरथी नन्दः, आचार्यः अध्यक्षः च साहित्यविभागः, श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृत-विश्वविद्यालयः, नवदेहली, (१०) आनन्दवर्धनविषये डॉ. नरेन्द्रकुमार पण्ड्या, आचार्यः, विश्वविद्यालय-सञ्चालित-संस्कृत-महाविद्यालयः, वेरावलम् इत्येते विद्वांसः व्याख्यानानि प्रस्तुतवन्तः।

दशानामपि व्याख्यानानाम् अपराह्णे ०३ तः ०४ वादनपर्यन्तं फेसबुकलाइवप्रसारणम् अभवत्। अस्याः व्याख्यानमालायाः मार्गदर्शनं कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः कृतवान्। आयोजनं कुलसचिवः डॉ. दशरथ जादवः एवं च संयोजनं प्राचार्यः डॉ. नरेन्द्रकुमार पण्ड्या अकरोत्। विशेषतश्चास्याः व्याख्यानमालायाः उद्घाटनकार्यक्रमे समापने च प्रासङ्गिकं व्याख्यानं विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः कृतवान्। उद्घाटनकार्यक्रमे श्रीलालबहादुरकेन्द्रियसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. रमेशकुमार पाण्डेयः आध्यक्षीयं प्रवचनं कृतवान् एवं च समापनकार्यक्रमे कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेडी महोदयः अध्यक्षीयं प्रवचनं प्रस्तवान्।

## अन्ताराष्ट्रिययोगदिवसे समायोजितः आन्तर्जालिकः परिसंवादः

श्रीसोमनाथसंस्कृतविश्वविद्यालये २१ जून २०२० दिनाङ्के अन्ताराष्ट्रियं योगदिवसम् उपलक्ष्य "योगः स्वास्थ्यं च" इति विषये एकः आन्तर्जालिकः परिसंवादः (वेबिनार) आयोजितः आसीत्। अस्मिन् आन्तर्जालिके कार्यक्रमे षोडशशतं जनाः सम्मिलिताः अभूवन्।

कार्यक्रमस्य आरम्भे अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमार पटेलः सर्वेषां स्वागतं विधाय कार्यक्रमस्य प्रास्ताविकं प्रस्तुवान्। अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण स्वर्णिम-गुजरात-स्पोर्ट्स्-विश्वविद्यालयस्य कुलपतिः डॉ. अर्जुनसिंह राणा उपस्थाय "योगः स्वास्थ्यं च" इति विषये स्वकीयं वक्तव्यं प्रास्तौत्। महोदयेन उक्तं यत् विश्वस्मिन् विश्वे योगस्य महत्त्वं वर्धमानम् अस्ति। जनाः योगद्वारा न केवलं शारीरिकं स्वास्थ्यं प्राप्नुवन्ति, परं मानसिकरोगाणां शमनाय अपि योगः अत्यन्तम् उपादेयः अस्ति। अस्य कार्यक्रमस्य अध्यक्षरूपेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतेः प्रो. गोपबन्धु मिश्रस्य उपस्थितिः आसीत्। अस्मिन् आन्तर्जालिके कार्यक्रमे विशेषवक्तृरूपेण डॉ. आर. जे. जाडेजा, डॉ. प्रवीन चौधरी महोदयः अपि उपस्थितः आसीत्। अस्य कार्यक्रमस्य सञ्चालनं डॉ. पंकजकुमार रावलः अकरोत्, तथा च संयोजनं शारीरिकशिक्षाध्यापकः डॉ. जयेशकुमार मुङ्गरा अकरोत्।



योगवेबिनारकार्यक्रमे भाषमाणः
डॉ. आर. जे. जाडेजा

## श्रीसोमनाथसंस्कृतविश्वविद्यालयेन समाचरितः अन्ताराष्ट्रिययोगदिवसः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन भारतसर्वकारस्य आयुषमन्त्रालयस्य तथा च गुजरातसर्वकारस्य निर्देशानुसारं २१ जून २०२० दिनाङ्के प्रतिवर्षमिव अन्ताराष्ट्रियः योगदिवसः समाचरितः। अस्मिन् वर्षे कोरोनामहामारीकारणात् "Yoga at Home and Yoga with Family" इति सङ्कल्पनायाः आधारेण विश्वविद्यालयस्य सर्वैः अधिकारिभिः प्राध्यापकैः, कर्मचारिभिः छात्रैश्च परिवारसदस्यैः सह योगदिवसस्य आचरणं विहितम्। तत्र विभिन्नानि आसनानि, प्राणायामाः इत्यादिमाध्यमेन सोत्साहं योगदिवसस्य नूतनतया समाचरणं जातम्। एतस्य योगदिवसकार्यक्रमस्य संयोजनं डॉ. जयेशकुमार मुङ्गरा अकरोत्।











## विश्वविद्यालयस्य अभिनवः प्रकल्पः शास्त्रपरिचयप्रकल्पः


पुनःसमीक्षासमितेः सदस्याः

श्रीसोमनाथसंस्कृतविश्वविद्यालये दृश्यश्रव्यसामग्रीनिर्माणचित्राङ्कनशाला (Audio-Video Recording Studio) अस्ति। अनेन केन्द्रमाध्यमेन विविधानां विदुषां व्याख्यानानां संग्रहणं भवति। विविधानां प्रकल्पानां पाठ्यक्रमाणाञ्च दृश्यश्रव्यसामग्रीनिर्माणं क्रियमाणं वर्तते। तस्य अङ्गतया २१.०५.२०२० तः ११.०६.२०२० यावत् विश्वविद्यालयद्वारा शास्त्रपरिचय-प्रकल्परूपेण प्रतिशास्त्रं षण्णां व्याख्यानानाम् आयोजनं कृतम्। तत्र साहित्यम्, व्याकरणम्, सर्वदर्शनम्, वेदः, पुराणेतिहासः, ज्योतिषम् इति विषयाणां ३६ व्याख्यानानां दृश्यश्रव्य-माध्यमेन सामग्रीनिर्माणं कृत्वा सामाजिकमाध्यमेन तेषां व्याख्यानानां विश्वविद्यालयस्य यूट्यूब इति समूहे स्थापना कृता। एतेषां शास्त्रपरिचयप्रकल्पचलच्चित्राणां यूट्यूबप्रसारणात् प्राक् विश्वविद्यालयेन एका समीक्षासमितिः रचिता आसीत् यत्र सदस्यरूपेण अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमार पटेलः, प्राचार्यः डॉ. नरेन्द्रकुमार पण्ड्या, व्याकरणप्राध्यापकः डॉ. दीपेश विनोद कतिरा, दर्शनप्राध्यापकः डॉ. जानकीशरण आचार्यः च आसन्। एनया समीक्षासमीत्या सर्वेषां पाठानां समीक्षां विधाय अपेक्षितं संशोधनं कृतम्। अनेन प्रकारेण विश्वविद्यालयः संस्कृत-भाषा-साहित्ययोः समाजे प्रचारं करोति।

## विश्वविद्यालयेन आचरितः ओनलाइन कालिदाससप्ताहः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन कोरोनाकाले विविधाः कार्यक्रमाः ओनलाइन आयोजिताः। तेषु अन्यतमः अस्ति कालिदाससप्ताहः। महाकविकालिदासस्य जन्मतिथिमुपलक्ष्य १६/०६/२०२० तः २२/०६/२०२० इति दिनाङ्केषु एषः सप्ताहः विश्वविद्यालयेन आचरितः। अस्य सप्ताहस्य उद्घाटनम् १६ तमे दिनाङ्के अभवत्। उद्घाटनसत्रस्य आरम्भः मङ्गलाचरणेन कुलगीतेन च अभवत्। ततश्च प्राचार्यः डॉ.नरेन्द्रकुमारः पण्ड्या महोदयः महानुभावानां स्वागतं प्रास्ताविकं च अवदत्। उद्घाटनसत्रस्य मुख्यः अतिथिः गुजरातराज्यस्य माननीयः शिक्षणमन्त्री श्रीभूपेन्द्रसिंह-चूडासमा महोदयः आसीत् तथा सारस्वतः अतिथिः विक्रमविश्वविद्यालयस्य माननीयः कुलपतिः प्रो.बालकृष्णः शर्मा महोदयः आसीत्। प्रो.बालकृष्णः शर्मा महोदयः महाकविकालिदासस्य साहित्यमधिकृत्य सारस्वतम् उद्बोधनम् अकरोत्। माननीयः शिक्षणमन्त्री कालिदासस्य साहित्येन प्रकृतिसंरक्षणस्य उपायानां विषये महत्वपूर्णं भाषणम् अकरोत्। अस्य कार्यक्रमस्य अध्यक्षः माननीयः कुलपतिवर्यः प्रो.गोपबन्धु-मिश्र-महोदयः आध्यक्षीयप्रवचनम् अकरोत्। अन्ते कुलसचिवः डॉ.दशरथः जादवमहोदयः धन्यवादज्ञापनम् अकरोत्। उद्घाटनसत्रस्य सञ्चालनं डॉ.ललितकुमार-पटेल-महोदयः अकरोत्। उद्घाटनकार्यक्रमस्य समाप्तौ सत्याम् ओनलाइन कालिदास-प्रश्नोत्तर्याः उद्घाटनम् अभवत्। सप्तदिवसेषु अस्यां प्रश्नोत्तर्याम् ७०० जनाः भागं गृहीत्वा ई-प्रमाणपत्रं प्राप्तवन्तः। अस्मिन् कालिदाससप्ताहे सप्तदिनपर्यन्तं प्रतिदिनं विविधाः कार्यक्रमाः आयोजिताः आसन्। कालिदास-सूक्ति-व्याख्यानम्, कालिदासीय-समस्यापूर्तिः, कालिदास-प्रश्नोत्तरी,मेघदूतस्य पद्यानां गानम् इत्यादयः कार्यक्रमाः ओनलाइन वेबेक्स माध्यमेन आयोजिताः।अस्मिन् सप्ताहे एकं विशिष्टं व्याख्यानम् अपि आयोजितम् आसीत्। तस्य मुख्यवक्ता प्रो.सदाशिवकुमारः द्विवेदिवर्यः आसीत्। सः कालिदासस्य साहित्ये विविधानामर्थानां सौन्दर्यम् अतीव सरसतया प्रास्तौत्।एतेषां विविधानां कार्यक्रमाणां सङ्कलनं डॉ.ललितकुमार-पटेलः तथा श्रीजिगरः भट्टः अकुरुताम्।


कार्यक्रमे भाषमाणः शिक्षणमन्त्री श्री भूपेन्द्रसिंह चूडासमा महोदयः


एतस्य सप्ताहस्य समापनम् २२/०६/२०२० तमे दिनाङ्के प्रातः १०.३० वादने जातम्। समापनसमारोहे विश्वविद्यालयेन माननीयः राज्यपालवर्यः आमन्त्रितः आसीत् किन्तु केनचित् कारणेन सः उपस्थातुं न शक्तवान्। समापने मुख्यवक्ता आसीत् महाकविकालिदासस्य शाकुन्तलनाटकस्य प्रसिद्धः संशोधकः प्रो. वसन्तकुमारः भट्टः। तेन कालिदास-विरचितस्य शाकुन्तलनाटकस्य विविधानाम् अर्थाणाम्, सङ्केतानां विषये अतीव सरसं व्याख्यानं प्रदत्तम्। समापनसत्रे अध्यक्षरूपेण उपस्थितः माननीयः कुलपतिवर्यः प्रो.गोपबन्धुमिश्र-महोदयः अस्य सप्ताहस्य सफलतापूर्वकम् आयोजनं जातं तदर्थं शुभकामनाः प्रदत्तवान् तथा महाकवि-कालिदासस्य साहित्यम् अद्यापि सर्वथा प्रासङ्गिकम् अस्ति इति स्ववक्तव्ये अवदत्। प्रतिदिनम् अस्य कार्यक्रमस्य फेसबूक माध्यमेन लाइव प्रसारणम् अभवत्। भागग्राहिणः वेबेक्समाध्यमेन कार्यक्रमेषु भागं गृहीतवन्तः। एषः सम्पूर्णः सप्ताहः डॉ. ललितकुमार-पटेलेन श्रीजिगरभट्टेन च सफलतया संयोजितः।

## २०१९-२०२० तमे शैक्षणिकवर्षे वाग्वर्धिनीसभायाः आयोजनम्

२०१९-२०२० तमे शैक्षणिकवर्षे श्रीसोमनाथसंस्कृतविश्वविद्यालये छात्राणां वाक्कौशलवर्धनाय प्रतिवर्षमिव वाग्वर्धिनीसभायाः आयोजनं कृतम्। प्रतिगुरुवारम् आयोजितायाम् अस्यां सभायां छात्राः स्वाधीतविषयानुगुणं स्वरुच्यनुगुणं च विषयान् चित्त्वा संस्कृतेन वाचा तेषां विषयाणां प्रस्तुतिः सर्वेषां छात्राणां पुरतः कुर्वन्ति। अस्मिन् शैक्षणिकवर्षे वाग्वर्धिनीसभायाः प्रथमम् अधिवेशनम् ११.०७.२०२० दिनाङ्के प्रवृत्तम्। यत्र सभाध्यक्षरूपेण वेदविभागाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः उपस्थितः आसीत्। सभायाः सञ्चालनम् आचार्यप्रथमवर्षीयच्छात्रेण प्रणवकश्यपेन कृतम्। अस्मिन् प्रथमाधिवेशने दशाधिकाः छात्राः भागम् अगृह्णन्। २०१९-२०२० तमे शैक्षणिकवर्षे वाग्वर्धिनीसभायाः आहत्य षट् सत्राणि अभूवन्। अस्मिन् शैक्षणिकवर्षे अस्याः वाग्वर्धिनीसभायाः अध्यक्षरूपेण प्रो. विनोदकुमार झा, तथा च संयोजकरूपेण दर्शनविभागस्य प्राध्यापकः डॉ. जानकीशरण आचार्यः कार्यम् अकरोत्।

## "संस्कृतसाहित्यद्वारा व्यक्तित्वविकासः" इति कार्यक्रमः सम्पन्नः

श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा २३.०६.२०२० तः ३०.०६.२०२० दिनाङ्कं यावत् प्रतिदिनं सायं पञ्च वादनात् षड् वादनं यावत् वेबेक्स एवं फेसबुकलाइवप्रसारणमाध्यमेन "संस्कृतसाहित्यद्वारा व्यक्तित्वविकासः" इत्याख्यशीर्षकयुक्तायाः व्याख्यानमालायाः आयोजनं जातम्। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतेः प्रो. गोपबन्धुमिश्रवर्यस्य प्रेरणया तथा च कुलसचिवस्य डॉ. दशरथजादववर्यस्य प्राशासनिकमार्गदर्शने कोविड-१९ महामारीकाले गृहे स्थितानां जनानां चिन्तानिवारणाय संस्कृतभाषाविकासाय आत्मविकासाय आयोजनमिदं जातम्। आधिभौतिके चाधिदैविके काले आध्यात्मिकसुखाय ज्ञानाय आत्मविकासाय श्रीसोमनाथ-संस्कृत-विश्वविद्यालयः किं कर्तुं शक्नोति तद् विचिन्त्य अष्टदिनात्मिका एका विशिष्टा व्याख्यानमाला समायोजिता। संस्कृतभाषासाहित्यं विपुलं प्रेरणाप्रदञ्च वर्तते, तत् समाजाभिमुखं कर्तुं अयमेकोपक्रमः प्रचालितः। उपक्रमेऽस्मिन् महापुरुषाणां मुखात् विविधविषयाङ्गभूतः ज्ञानप्रवाहः निःसृतः, तेन च प्रत्येकं जनस्य आत्मिकविकासः, व्यक्तित्वविकासः कथं भवेत् तदेव चिन्तनमासीत्। प्रवाहेऽस्मिन् विविधैः सारस्वतवक्तृभिः विविधानां ग्रन्थानामाश्रयं कृत्वा एकः एव निष्कर्षः दत्तः यत् संस्कृतभाषायां संस्कृतसाहित्ये वा यः कोऽपि ग्रन्थो भवतु तस्मिन् ग्रन्थे व्यक्तित्वविकासस्य विचाराः निगूहिताः सन्त्येव।


विषयं प्रस्तुवन् पूज्यः ज्ञानवत्सलस्वामी

इत्थं संस्कृतभाषायाः साहित्यवैभवम् अन्तिमलक्ष्यरूपेण व्यक्तित्वविकासाय एव प्रवर्तते। इदानीं काले आवश्यकता अस्ति दृष्टेः। सा दृष्टिः एतैः सारस्वतवक्तृभिः प्रदत्ता। अस्यां व्याख्यानमालायाम् अधोलिखिताः वक्तारः आसन्-

| क्रमः | दिनाङ्कः | वक्ता | विषयः |
|---|---|---|---|
| १ | २३.०६.२०२० | पूज्यः मुदितवदनानन्दः महाराजः, नडियाद | व्यक्तित्वविकास में श्रीमद्भगवद्गीता का योगदान |
| २ | २४.०६.२०२० | पूज्यः श्रीरमेशभाई ओझा, पोरबन्दर | संस्कृतवाङ्मयद्वारा व्यक्तित्वविकास |
| ३ | २५.०६.२०२० | श्री मितेश विनोद कतिरा, मुम्बई | संस्कृतभाषा द्वारा बालविकास |
| ४ | २६.०६.२०२० | श्रीमती इन्दुमती काटधरे, कर्णावती | संस्कृतकी ज्ञानसम्पदा एवं व्यक्तित्व विकास |
| ५ | २७.०६.२०२० | पूज्यः डॉ. महादेवप्रसाद महेता, वेरावल | श्रीमद्वाल्मीकिरामायण द्वारा व्यक्तित्व विकास |
| ६ | २८.०६.२०२० | डॉ. कृणालभाई जोषी, कर्णावती | पुराणवाङ्मय द्वारा व्यक्तित्व विकास |
| ७ | २९.०६.२०२० | पूज्यः ज्ञानवत्सलस्वामी, वडोदरा | महाभारत द्वारा व्यक्तित्व विकास |
| ८ | ३०.०६.२०२० | पूज्यः माधवप्रियदासस्वामी, कर्णावती | शास्त्रोपासना द्वारा व्यक्तित्व विकास |

अस्याः व्याख्यानमालायाः उद्घाटनसत्रे डॉ. बाबासाहेब-आम्बेडकर-मुक्त-विश्वविद्यालयस्य कुलपतिः प्रो. अमीबेन उपाध्यायवर्या मुख्यातिथिरूपेण उपस्थाय अस्य उपक्रमस्य वर्तमानसन्दर्भे प्रासङ्गिकतां प्रतिपादितवती। तया स्वप्रसन्नता अपि प्रकटिता। अस्याः व्यक्तित्वविकासव्याख्यानमालायाः समापनसत्रे मुख्यातिथिरूपेण महर्षि-पाणिनी संस्कृत एवं वैदिक विश्वविद्यालयस्य कुलपतिः प्रो. पङ्कज एल. जानी उपस्थितः आसीत्। श्रीसोमनाथसंस्कृतविश्वविद्यालयेन समायोजितायाः अस्याः व्यक्तित्वविकासव्याख्यानमालायाः सयोजकत्वेन अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमार पटेलः, तथा च पुराणसङ्कायाध्यक्षः डॉ. पङ्कजकुमाररावलः कार्यम् अकुरुताम्। व्याख्यानमालायाः समापनसत्रे कुलसचिवः डॉ. दशरथजादवः कृतज्ञताविष्कृतिं कृतवान्।

## शैक्षणिकभवने सरस्वतीदेव्याः पूजनोत्सवः

सरसः प्रशंसिता ज्ञानादयो गुणा विद्यन्ते यस्यां सा सर्वविद्या-प्रापिका वाग्देव्याः पूजनमहोत्सवः श्रीसोमनाथसंस्कृतविश्वविद्यालय-परिसरे प्रभासज्योतिशैक्षणिकभवने श्रीसरस्वतीदेव्याः मन्दिरे जनुयारी-मासस्य ३० तमे दिनाङ्के समायोजितः आसीत्। अस्मिन् दिवसे प्रातः अष्टवादने प्रतिष्ठितसरस्वतीप्रतिमायाः पूजनं हवनञ्च वैदिकरीत्या छात्रैः अध्यापकैश्च अक्रियत। मुख्ययजमानरूपेण माननीयाः कुलपतिमहोदयाः सपरिवारं भागग्रहणं कृत्वा विश्वविद्यालयस्य सर्वाङ्गीणविकासाय भगवत्याः सरस्वतीदेव्याः पूजनं कृतवन्तः। पूजनावसरे छात्रैः सम्भूय ऋग्वेदस्य सरस्वतीसूक्तस्य श्रीसूक्तस्य च पाठः विहितः। अस्य कार्यक्रमस्य संयोजनं डाँ शत्रुघ्नपाणिग्राही अकरोत्।





## योगच्छात्राणां योगाश्रमे परिचयकार्यक्रमः

श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रचालितस्य एम.ए. योगविषयस्य द्वितीयवर्षीयच्छात्राः स्वपाठ्यक्रमान्तर्गत-परिचयकार्यक्रमे ईशापुर-स्थितस्य "योगाश्रम-नेचर-केयर-सेंटर" इत्याख्यस्य केन्द्रस्य २९ फरवरी २०२० दिनाङ्के परिचयं प्राप्तवन्तः। योगाश्रमस्य अधिकारिभिः तत्र प्रचलितानां योग-आयुर्वेद-निर्सर्गोपचार-एक्युप्रेसर-नेचरोपेथि-विषयाणां परिचयः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्राणां कृते प्रदत्तः। अस्मिन् परिचयकार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य षट् छात्राः, तथा च योगप्राध्यापिका कुमारी दृष्टि बारैया, कु. धरम कचोट, डॉ. जयेशकुमार मुङ्गरा च उपस्थिताः आसन्।



## अखिलभारतीय-अन्तर्विश्वविद्यालय-योगप्रशिक्षणवर्गस्य आयोजनम्

आन्ध्रप्रदेशस्थेन राजीवगान्धी-युनिवर्सिटी-ऑफ-नॉलेज-टेक्नोलॉजी इत्यनेन जनवरीमासस्य षष्ठदिनाङ्कात् दशमदिनाङ्कं यावत् अखिलभारतीय-अन्तर्विश्वविद्यालय-योगप्रशिक्षणवर्गस्य आयोजनं कृतं यत्र श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य षड् योगच्छात्राः, पञ्च योगच्छात्र्यश्च भागं गृहीत्वा प्रशंसनीयं योगप्रदर्शनं विहितवत्यः। अस्य योगप्रशिक्षणदलस्य नेतृत्वं शारीरिकशिक्षणप्राध्यापकः डॉ. जयेशकुमार मुङ्गरा अकरोत्। एतेषां छात्राणाम् अस्मिन् योगप्रशिक्षणवर्गे सिद्धतां कर्तुं श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २८ दिसम्बरतः ३ जनवरी २०२० पर्यन्तं पूर्वसिद्धतावर्गस्य अपि आयोजनम् अक्रियत।

प्रशिक्षणवर्गे भागं गृहीतवतां छात्राणां नामानि –

| | |
|---|---|
| 1. मारिया दिव्या | अनुस्नातकविभागः, SSSU वेरावलम् |
| 2. लखनोत्रा चन्द्राबेन | अनुस्नातकविभागः, SSSU वेरावलम् |
| 3. सुवा किञ्जल | अनुस्नातकविभागः, SSSU वेरावलम् |
| 4. असोदरिया भवती | संस्कृत-महाविद्यालयः, SSSU वेरावलम् |
| 5. चौधरी करुणा | अनुस्नातकविभागः, SSSU वेरावलम् |
| 6. रादडिया रविः | अनुस्नातकविभागः, SSSU वेरावलम् |
| 7. पाण्डेय सत्यव्रतः | संस्कृत-महाविद्यालयः, SSSU वेरावलम् |
| 8. त्रिवेदी हर्षलः | अनुस्नातकविभागः, SSSU वेरावलम् |
| 9. शियाणि जयेशः | संस्कृत-महाविद्यालयः, SSSU वेरावलम् |
| 10. जोषी राहुलः | ब्रह्मर्षिसंस्कृतमहाविद्यालयः, नडियाद |
| 11. राजगोर जयदीपः | अनुस्नातकविभागः, SSSU वेरावलम् |







प्रशिक्षणे दत्तचित्ताः छात्राः

## वनभ्रमणशिबिरे श्रीसोमनाथसंस्कृतविश्वविद्यालयच्छात्राणां भागग्रहणम्



कार्यक्रमे सम्मिलिताः छात्राः अध्यापकाश्च

०८ मार्च २०२० तमे दिनाङ्के रोटरी-क्लब-वेरावलद्वारा चोरवाडतः वेरावल-समुद्रतटं यावत् १६ किलोमीटरपरिमितस्य वनभ्रमण-शिबिरस्य आयोजनं विहितम् आसीत्, यत्र श्रीसोमनाथ-संस्कृतविश्वविद्यालयस्य षोडश छात्राः भागं गृहीतवन्तः। शारीरिक-शिक्षणप्राध्यापकस्य डॉ. जयेशकुमार मुङ्गरावर्य निर्देशने इमे पञ्चदश छात्राः वनभ्रमण-शिबिरे भागं गृहीत्वा पर्यावरणसम्बद्धान् विषयान् ज्ञातवन्तः। अस्मिन् शिबिरे भागग्रहीतवतां छात्राणां नामानि –
१. जोषी मेहुलः, २. त्रिवेदी हर्षलः, ३. दवे नीलः, ४. शियाणी जयेशः, ५. रादड़िया रविः, ६. जोषी स्मितः, ७. केशवकुमार झा, ८. राजगोर जयदीपः, ९. पण्ड्या रिधमः, १०. त्रिपाठी ऋषिः, ११. अभिनन्दनकुमार दुबे, १२. आशीष कुमार मिश्रः, १३. त्रिवेदी हर्षदः, १४. त्रिवेदी पार्थः, १५. जोषी ध्रुविनः, १६. दवे निकुञ्जः।

## विश्वविद्यालयस्य छात्राणां धावनप्रतियोगितायां भागग्रहणम्

जूनागढ-महानगरपालिकाद्वारा ०२ फरवरी २०२० दिनाङ्के आयोजितायां जूनागढ-मैराथन-प्रतियोगितायां श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य दश छात्राः तथा च शारीरिकशिक्षणप्राध्यापकः डॉ. जयेशकुमारमुङ्गरा भागग्रहणं कृतवान्। अस्यां प्रतियोगितायां छात्रैः दशकिलोमीटरपरिमितं धावनं पूर्णं कृत्वा प्रशस्तिपत्रं प्राप्तम्। एतस्मिन् कार्यक्रमे विश्वविद्यालयपक्षतः छात्राणां मार्गदर्शनं डॉ. जयेशकुमार मुंगरा महोदयः अकरोत्।




कार्यक्रमे भागं गृहीतवन्तः छात्राः

## महाविद्यालयवार्ताः

### ब्रह्मर्षिसंस्कृतमहाविद्यालयः नडियाद



- **अतिथि देवो भव -** फरवरीमासस्य ०४ दिनाङ्के ब्रह्मर्षिसंस्कृतमहाविद्यालये कर्णावतीनगरात् अतिथिस्वरुपेण समागता विदुषी डो.श्रीप्रज्ञाबहेन जोषी महोदया। अनया ब्रह्मर्षिसंस्कृतमहाविद्यालयस्थानां छात्राणां कृते तत्त्वाचार्यकक्षायाम् अवधेयाः विषयाः बिन्दवश्च उपदिष्टाः। ब्रह्मर्षिसंस्कृतमहाविद्यालयपक्षतः तेषां स्वागतं विधाय आभारः प्रकटितः।
- **वार्षिकोत्सवः** - ब्रह्मर्षिसंस्कारधामपरिसरे 26-02-2020 दिनाङ्के वार्षिकोत्सवः सर्वैः प्राचार्यप्राध्यापकछात्रप्रभृतिभिः सोत्साहम् अनुभावितः,ब्रह्मर्षिसंस्कृतमहाविद्यालयस्य स्थापनादिनं तथा च पद्मश्री, डो. डाह्याभाई शास्त्रिणां जन्मदिनम् उभयमपि तद्दिनाङ्के एव। अस्मिन् दिने पूज्यानां गुरूणां श्रेयसे प्रेयसे च इज्या, नूतनयज्ञशालायाः भूमिपूजनम्, गोपूजनम्, नर्मदेश्वरपूजनम्, विप्रभोजनम्, सत्पूजनम्, अतिथिपूजनञ्च सर्वम् इदम् अजायत। अस्मिन्नेव दिने अस्य विद्यालयस्य रजतजयन्तीप्रवेशः। छात्राणां विविधाः स्पर्धाः, नाटकगीतानि, प्रवचनसत्राणि,पाल्यपालकसम्मेलनम्, पुरस्कारवितरणम्, सर्वमेतत् सोत्साहम् अक्रियत।
- **अध्यापनप्रशिक्षणम् -** मई-जून, मासः.२०२० - कोविड-19 इत्यस्य प्रभावेण सर्वे गृहे स्थिताः आसन्, तदा ब्रह्मर्षिसंस्कृतमहाविद्यालये डो.पद्मश्री, डाह्याभाई शास्त्रीणां प्रेरणया छात्राणां कृते विद्याध्ययनं कथं सरलं सुगम्यं भवेत् ? तथा संस्कृतभाषायाः ज्ञानं सरसं कथं स्यात्? इत्यस्मिन् विषये चिन्ता प्रकटिता,तदा ब्रह्मर्षिसंस्कृतमहाविद्यालयस्य प्रधानाचार्याः डो.अमृतलाल भोगायताजी द्वारा शिक्षकवृन्दैः मिलित्वा अध्यापनप्रशिक्षणाय एकः प्रविधिः आयोजितः। तत्र प्रतिदिनं प्रत्येकं शिक्षकः स्वस्य विषायान् विशेषतया विज्ञानेन सहितं सरसतया प्रास्तौत्। कार्यक्रमोऽयं मासद्वयं यावत् प्रावर्तत

## वार्तापत्रेषु श्रीसोमनाथसंस्कृतविश्वविद्यालयः



## प्राध्यापकानाम् उपलब्धयः शैक्षणिकगतिविधयश्च

**डॉ. नरेन्द्रकुमार एल. पण्ड्या**

१. दि. २१/५/२०२० तः ०३/०६/२०२० पर्यन्तम् श्रीसोमनाथ-संस्कृत-विश्वविद्यालयेन आयोजितायाः संस्कृतकविपरिचय-व्याख्यानमालायाः मुख्यसंयोजकत्वेन कार्यं कृतं एवञ्च आनन्दवर्धनपरिचय इति विषये व्याख्यानं प्रस्तुतम्।

२. श्रीसोमनाथसंस्कृतयुनिवर्सिटीद्वारा आयोजितायां श्रीमद्भागवत-पुराणव्याख्यानमालायां ०९/०५/२०२० तः २०/०५/२०२० दिनाङ्कं यावत् फेसबुकलाइवप्रसारणे द्वादशव्याख्यानानि प्रस्तुतानि।

३. श्रीभागवतविद्यापीठद्वारा आयोजिते श्रीमद्भागवतसत्रे दशमस्कन्धे फेसबुकलाइवप्रसारणे २५/०५/२०२० दिनाङ्के व्याख्यानं प्रस्तुतम्।

४. श्रीसोमनाथसंस्कृतयुनिवर्सिटीद्वारा आयोजिते संस्कृतकवि-सम्मेलने भागं गृहीत्वा स्वरचितकाव्यपाठः ३०/०५/२०२० दिनाङ्के प्रस्तुतः।

५. ०३/०६/२०२० - श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितायां संस्कृतकवि-परिचयव्याख्यानमालायाम् आनन्द-वर्धनाचार्यः इति विषये फेसबुकलाइवप्रसारणे व्याख्यानं प्रस्तुतम्।

प्रकाशनम्

१. वाक्यार्थज्योतिः, तृतीयाङ्कः, मार्च-२०२०, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्, ISBN-978-93-83097-42-5, श्रीमद्भगवद्गीतायां निरूपितानि ज्ञानलक्षणानि (पृष्ठाङ्क-१०-१९) (लेखः)।

२. भारतीयदर्शनसिद्धान्तप्रभा, मार्च-२०२०, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्, ISBN-978-93-83097-35-7, रामानन्दसम्प्रदाये तत्त्वत्रयविमर्शः (पृष्ठाङ्क-२२७-२३८) (लेखः)।

३. भाष्यपरम्परा ज्ञानप्रवाहश्च, मार्च-२०२०, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्, ISBN-978-93-83097-43-2, श्रीमद्भागवतदशमस्कन्धीयगोपीगीते विविधव्याख्यानां वैशिष्ट्यविमर्शः (पृष्ठाङ्क-३४-४७) (लेखः)।

**प्रो. महेन्द्रकुमारः अं. दवे**

१. १६.०३.२०२० तमे दिनाङ्के कच्छयुनिवर्सिटीद्वारा आयोजिते Ph.D. - RDC – इत्यस्मिन् कार्यक्रमे विषयनिष्णातरूपेण शोधच्छात्राणां मार्गदर्शनं कृतम्।

२. १७.६.२०२० तमे दिनाङ्के गवर्नमेन्ट आर्ट्स एवं कॉमर्स कॉलेज, नेत्रंगे Webinar इत्यस्मिन् कार्यक्रमे "स्वप्नवासवदत्त के संदर्भ में स्वप्न मंथन" विषये व्याख्यानं प्रदत्तम्।

**डॉ. शत्रुघ्न पाणिग्राही**

१. ११-१३ फरवरी २०२० श्रीसोमनाथसंस्कृतविश्वविद्यालयेन "भाष्यपरम्परा ज्ञानप्रवाहश्च" इति विषये समायोजिते अन्ताराष्ट्रिय-परिसंवादे "आचार्यसायणस्य वैदिकभाष्यप्रवृत्तिः आलोचनासिद्धान्तश्च" इति विषये शोधपत्रं प्रस्तुतम्।

२. ०६-०७ मार्च २०२० - श्रीजगन्नाथसंस्कृतविश्वविद्यालयेन आयोजितायां राष्ट्रियसङ्गोष्ठ्या "उवट्टस्य वेदभाष्यप्रवृत्तिः" इति विषये शोधपत्रस्य प्रस्तुतिः।

प्रकाशनम् -

१. मार्च- २०२० "दर्शनशास्त्रेषु वेदस्यापौरुषेयत्वविचारः" इति शोधलेखस्य प्रकाशनं "भारतीयदर्शनसिद्धान्तप्रभा" इत्यत्र (ISBN 978-93-83097-35-7)

२. मार्च २०२० "वैदिकी देवता" इति शोधपत्रस्य प्रकाशनं "वाक्यार्थज्योतिः" इत्यत्र (ISBN 978-93-83097-42-5)

३. "आचार्यसायणस्य वैदिकभाष्यप्रवृत्तिः आलोचनासिद्धान्तश्च" इति शोधपत्रस्य प्रकाशन "भाष्यपरम्परा ज्ञानप्रवाहश्च" इति पुस्तके (ISBN 978-93-83097-43-3)

४. "वेदानां संरक्षणे विकृतिपाठानां योगदानम्" इति शोधपत्रस्य प्रकाशनं शोधज्योतिः (ISSN 2350-0700) इति पत्रिकायाम्।

**डॉ. ललितकुमारः पटेलः**

३. ०९/०५/२०२० तमे दिनाङ्के श्रीसोमनाथसंस्कृत-विश्वविद्यालयद्वारा भारतीय संस्कृति एवं हमारी जीवनशैली इति विषयोपरि समायोजितेऽन्तर्जालीयपरिसंवादे भागं गृहीतवान्।

४. १५.०६.२०२० दिनाङ्के अनुस्नातकविभागस्य अध्यक्षत्वेन नियुक्तः।

५. संस्कृतभारती- गुजरातद्वारा यूट्यूब माध्यमेन मुख्यभूतानाम् अलङ्काराणां परिचयविषये अष्ट व्याख्यानानि ओनलाइनमाध्यमेन प्रदत्तानि।

६. Sanskrit & Employment इति विषये MJSG महिलाकलामहाविद्यालये २५/०२/२०२० तमे दिनाङ्के व्याख्यानं दत्तवान्।

७. सम्पत्यै संस्कृतम् इति विषये २५/०२/२०२० तमे दिनाङ्के जूनागढे बहाउद्दीनमहाविद्यालये व्याख्यानं दत्तवान्।

प्रकाशनम् -

५. विश्वविद्यालयेन प्रकाशितस्य " संस्कृतवाङ्मये नगररचना" ग्रन्थस्य सम्पादकः। ISBN-978-93-83097-40-1। तत्रैव " संस्कृतवाङ्मयानुसारं नगरे जलव्यवस्था" विषये लेखः प्रकाशितः।

६. " शोधज्योतिः" शोधपत्रिकायां " अभिज्ञानशाकुन्तलमङ्गल-विमर्शः तत्र शिवतत्त्वञ्च" इति लेखः प्रकाशितः। (ISSN-2350-0700)

**डॉ. डी. एम. मोकरिया**

१. ०३.०२.२०२० श्रीस्वामिनारायणगुरुकुलसञ्चालितविद्यालये (प्रभासपत्तने) संस्कृतस्य प्रचाराय व्याख्यानं प्रदत्तम्।

२. श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला-२१ अन्तर्गते "वाक्यार्थज्योतिः" अङ्कः-३, वर्षम्-२०१७-२०१८ इत्यस्य सम्पादकत्वेन कार्यं कृतम्।

**डॉ. पङ्कजकुमार एस. रावल**

१. ०६/०२/२०२० वाक्यार्थपरिषदि "श्रीमद्भगवद्गीतायां गुरु-शिष्ययोः भूमिका" इत्यस्मिन् विषये शोधपत्रप्रस्तुतिः।

२. १४.०२.२०२० दिनाङ्के S.G.V.P. गुरुकुले अष्टावधानस्य कार्यक्रमे दायित्वम् ऊढम्।

३. २०/०२/२०२० श्रीसोमनाथसंस्कृतविश्वविद्यालये मातृभाषा-दिवसस्य आयोजनं तत्र च व्याख्यानं प्रस्तुतम्।

## प्राध्यापकानाम् उपलब्धयः शैक्षणिकगतिविधयश्च

४. २२/०२/२०२० दिनाङ्के कर्णावत्यां संस्कृतविद्याप्रतिष्ठाने गीतायां गुरु-शिष्यपरम्परा इत्यस्मिन् विषये विशिष्टं व्याख्यानं मुख्यवक्तृत्वेन प्रस्तुतम्।

५. ०७/०३/२०२० एवं ०८/०३/२०२० दिनद्वयं मुम्बापुर्यां श्रीमद्भागवतमहापुराणसंगोष्ठ्यां भागग्रहणम्। आयोजक-संस्था- श्रीवल्लभसदनम्, मुम्बापुरी।

६. ०९/०५/२०२० तः २०/०५/२०२० दिनाङ्कं यावत् श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा श्रीमद्भागवतमहापुराणव्याख्यानमालायां मुख्यसंयोजकत्वेन दायित्वनिर्वहणम्।

७. २२/०५/२०२० दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालये शास्त्रपरिचयप्रकल्पे महर्षिः वाल्मीकिः तत्कृतिश्च एतस्मिन् विषये व्याख्यानम्।

८. २३/०५/२०२० दिनाङ्के श्रीभागवतविद्यापीठद्वारा समायोजिते पुण्यप्रियस्मरणपर्वणि श्रीमद्भागवतमहापुराणस्य नवमे स्कन्धे १ तः १३ अध्यायेषु फेसबुकलाइवमाध्यमेन व्याख्यानं प्रस्तुतम्।

९. २७/०५/२०२० श्रीसोमनाथसंस्कृतविश्वविद्यालये शास्त्र-परिचयप्रकल्पे महर्षेः व्यासस्य तत्कृतेः महाभारतस्य च परिचयः इत्यस्मिन् विषये व्याख्यानम्।

१०. २९/०५/२०२० मध्यप्रदेशस्य आध्यात्मिकजनैः समायोजिते अध्यात्मज्ञानमहोत्सवे "और देवता चित्त न धरई" इति शिर्षकेण फेसबुकलाइवमाध्यमेन लाइव व्याख्यानं प्रस्तुतम्।

११. ३०/०५/२०२० दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालय-द्वारा आयोजिते आधुनिककविसम्मेलने मुख्यसंयोजकत्वेन कार्यं कृतम्।

१२. ०६/०६/२०२० दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालय-द्वारा शास्त्रपरिचयप्रकल्पे पुराणं हृदयं स्मृतम् इति शीर्षकेण व्याख्यानम्।

१३. १०/०६/२०२० दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालय-द्वारा शास्त्रपरिचयप्रकल्पे गीता-देवीभागवत-गरुडपुराणादि-ग्रन्थानां विशेषपरिचयः इत्यस्मिन् विषये व्याख्यानम्।

१४. १६/०६/२०२० दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालय-द्वारा आयोजिते कालिदाससप्ताहमहोत्सवे भागग्रहणम्।

१५. २३/०६/२०२० तः ३०/०६/२०२० दिनाङ्कं यावत् श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा फेसबुकलाइवमाध्यमेन " संस्कृतसाहित्यद्वारा व्यक्तित्वविकासः" इति विषयेन व्याख्यानमालायां मुख्यसंयोजकत्वेन कार्यं कृतम्।

प्रकाशनम् -

१. वाक्यार्थज्योतिः, तृतीयाङ्कः, मार्च-२०२०, श्रीसोमनाथ-संस्कृतयुनिवर्सिटी, वेरावलम्, ISBN-978-93-83097-42-5, श्रीमद्भगवद्गीतानुसारेण शान्तिप्राप्त्युपायाः (पृष्ठाङ्क-५८-६६) (लेखः)।

२. संस्कृतवाङ्मये नगरसंरचना, मार्च-२०२०, श्रीसोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्, ISBN-978-93-83097-40-१, श्रीमद्वाल्मीकीयरामायणे बालकाण्डे अयोध्याकाण्डे च नगरनिर्माणम् (पृष्ठाङ्क-१५०-१५७) (लेखः)।

३. भारतीयदर्शनसिद्धान्तप्रभा, मार्च-२०२०, श्रीसोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्, ISBN-978-93-83097-35-७, श्रीमद्भागवतमहापुराणे तृतीयैकादशस्कन्धयोः साङ्ख्यदर्शनम् (पृष्ठाङ्क-५५-६५) (लेखः)।

**डॉ. बी. उमामहेश्वरी**

१. 'प्रमाणमीमांसा' इति शोधलेखस्य प्राचीसुधा नाम्नि शोधपत्रिकायां (ISSN-2249-2313) प्रकाशनम्।

२. राष्ट्रियसंगोष्ठ्याः शोधपत्राणां समुदायः 'भारतीयदर्शन-सिद्धान्तप्रभा' नामकशोधग्रन्थस्य ISBN- 978-93-83097-35-7, मार्च-२०२० वर्षे सम्पादनम्।

३. 'आधुनिकपरिप्रेक्ष्ये कालः एकं चिन्तनम्' इति शोधलेखं 'भारतीयदर्शनसिद्धान्तप्रभा' नामकशोधग्रन्थे ISBN- 978-93-83097-35-7 मध्ये प्रकाशनम्।

४. वाक्यार्थज्योतिः अङ्कः-३, २०१७-१८ इत्यस्य ISBN- 978-93-83097-42-5 द्वारा २०२० वर्षे सम्पादनं विहितम्।

५. 'गुरुत्वद्रवत्वयोः वैज्ञानिकं चिन्तनम्' इतिशोधलेखस्य वाक्यार्थज्योतिः अङ्कः-३ ISBN- 978-93-83097-42-5 मध्ये प्रकाशनम्।

६. पदविका-योगाभ्यासक्रमस्य निर्माणाय संयोजिकात्वेन कार्यम् अकरोत्।

७. M . A . वार्षिक-योगाभ्यासक्रमं सत्ररूपेण निर्माणाय संयोजिकात्वेन कार्यम् अकरोत्।

८. M. Phil. द्वितीयसत्रे द्वितीयपत्रस्य अभ्यासक्रमनिर्माणाय संयोजिकात्वेन कार्यं कृतम्।

**डॉ. जानकीशरण आचार्यः**

१. ११ तः १३ फरवरी २०२० पर्यन्तं "भाष्यपरम्परा ज्ञानप्रवाहश्च" इति विषयमधिकृत्य आयोजितस्य अन्ताराष्ट्रिय-परिसंवादस्य (International Conference) संयोजनकार्यं कृतम्।

२. श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा ०९.०५.२०२० तमे दिनाङ्के "भारतीय संस्कृति एवं हमारी जीवनशैली" इति विषयोपरि समायोजितेऽन्तर्जालीयपरिसंवादे भागं गृहीतवान्।

३. श्रीसोमनाथसंस्कृतविश्वविद्यालये आयोजितायाः २०१९-२०२० तमस्य शैक्षणिकवर्षस्य "वाक्यार्थपरिषदः" संयोजनं कार्यं विहितम्।

४. मई-२०२० - श्रीसोमनासंस्कृतविश्वविद्यालयस्य "शास्त्र-परिचयप्रकल्पः" इति कार्यक्रमे दर्शनविषयसम्बद्धानि त्रीणि व्याख्यानानि प्रदत्तानि।

५. दर्शनसङ्कायस्य M . P h i l . द्वितीयसत्रे द्वितीयपत्रस्य अभ्यासक्रमनिर्माणाय विषयविशेषज्ञरूपेण कार्यम् अकरोत्।

शोधपत्राणि -

१. "अवस्थात्रये वृत्तिविचारः" – शोधज्योतिः (प्रथमाङ्कः) – ISSN - 2350-0700

२. "आत्मनः अखण्डार्थत्वम्" – वाक्यार्थज्योतिः (तृतीयाङ्कः) ISBN - 978-93-83097-42-5

३. "अद्वैतवेदान्ते मातृकाग्रन्थाः कैवल्यदीपिका च" – भारतीयदर्शनसिद्धान्तप्रभाः ISBN - 978-93-83097-35-7

## प्राध्यापकानाम् उपलब्धयः शैक्षणिकगतिविधयश्च

पुस्तकानि -

१. श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वार्तापत्रस्य "सोमज्योतिः" (द्वाविंशः अङ्कः) इत्यस्य सम्पादनं विधाय प्रकाशनं कृतम्।
२. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन समायोजिते अन्ताराष्ट्रिय-परिसंवादे प्रस्तुतानां शोधनिबन्धानां सम्पादनं विधाय "भाष्यपरम्परा ज्ञानप्रवाहश्च" इति नाम्ना पुस्तकस्य (ISBN-978-93-83097-43-3) प्रकाशनं कृतम्।
३. "भाष्यावास्यम्" (सम्पादनम्), श्रीसोमनाथसंस्कृत-विश्वविद्यालयः, वेरावलम् – ISBN - 978-93-83097-39-5
४. श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य "शोधज्योतिः" (अङ्कः – ०१) इति शोधपत्रिकायाः सम्पादनं विधाय प्रकाशनं कृतम्।

**डॉ. आशाबेन जी माढक:**

१. ७/२/२०२० – KCG द्वारा आयोजिते UDISHA अन्तर्गत (बरवाला) सरकारी विनयन एवं वाणिज्य महाविद्यालये "सकारात्मक विचाराः" इति विषये व्याख्यानद्वयं कृतम्।
२. ७/२/२०२० - KCG द्वारा आयोजिते SAPTDHARA अन्तर्गत सरकारी विनयन एवं वाणिज्य महाविद्यालये (१) वैदिकसाहित्यस्य सामान्यपरिचयः (२) लौकिकसाहित्ये पुराणां सामान्यपरिचयः इति विषये व्याख्यानद्वयं प्रस्तुतम्।
३. १०/०७/२०२० श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा आयोजितस्य स्पन्दनम् online पूर्वच्छात्रसम्मेलनस्य संयोजिकारूपेण कार्यं संपादितम्।
४. ३०/०८/२०२० तः ०६/०८/२०२० पर्यन्तं श्रीसोमनाथ-संस्कृतविश्वविद्यालये आयोजितस्य "संस्कृत-सप्ताहोत्सवः" इत्यस्य संयोजिकारूपेण कार्यं संपादितम्।

**श्रीजिगरः भट्टः**

१. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ३०/०५/२०२० आयोजिते ओनलाइन कविसम्मेलने स्वरचितकाव्यानां प्रस्तुतिः कृता।
२. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १६ तः २२/०६/२०२० तमेषु दिनाङ्केषु आयोजिते ओनलाइन कालिदास-सप्ताहस्य सहसंयोजकत्वेन कार्यं कृतम्।
३. डिप्लोमा इन संस्कृत लर्निंग पाठ्यक्रमनिर्माणाय परामर्शकरूपेण कार्यम् अकरोत्।
४. डिप्लोमा इन संगीत तथा डिप्लोमा इन रंगमंच इत्यनयोः अभ्यासक्रमनिर्माणसमितेः संयोजकत्वेन कार्यम् अकरोत्।

**कु. अपूर्वा अग्रवाल**

१. "डिप्लोमा इन वास्तुशास्त्र" इत्यस्य नूतनाभ्यासक्रमनिर्माणाय संयोजिकात्वेन कार्यं कृतम्।
२. "डिप्लोमा इन ज्योतिषशास्त्र" इत्यस्य नूतनाभ्यासक्रम-निर्माणाय संयोजिकात्वेन कार्यं कृतम्।





**विश्वविद्यालये निर्मीयमाणानि निर्मितानि च भवनानि सौविध्यानि च**





## श्रीसोमनाथसंस्कृतविश्वविद्यालये नवनियुक्तयः



**सुश्री अपूर्वा अग्रवाल**

सहायिकाचार्या (ज्योतिषम्)

नियुक्तिदिनाङ्क २४.०२.२०२०



**सुश्री खुश्बू वाय. राजपोपट**

स्टेनोग्राफर (गुजराती)

नियुक्तिदिनाङ्क १९.०३.२०२०

## संस्कृतस्य प्रचार-प्रसाराय विश्वविद्यालयस्य अध्यापकानां प्रवृत्तयः

श्रीसोमनाथसंस्कृतविश्वविद्यालयः संस्कृतस्य शास्त्रपठनपाठनपद्धतिद्वारा शास्त्रसंरक्षणेन सह संस्कृतस्य प्रचारप्रसाराय अपि बद्धकटिः वर्तते। आवर्षं विश्वविद्यालयेन संस्कृतस्य प्रचारप्रसाराय नैके उपक्रमाः आयोज्यन्ते। तदन्तर्गतं विश्वविद्यालयस्य अध्यापकैः जनवरी-फरवरी-मार्च-२०२० मासेषु गुजरातराज्ये स्थितेषु विविधेषु विद्यालयेषु महाविद्यालयेषु च गत्वा तत्र छात्रेभ्यः संस्कृतस्य विषये मार्गदर्शनं दत्तम्। विश्वविद्यालये संस्कृतस्य अध्ययनावसरः, छात्रसौविध्यम्, विश्वविद्यालयस्य वैशिष्ट्यम् इत्यादिभिः विषयैः सह तैः अध्यापकैः छात्राणां कृते संस्कृतं पठित्वा उद्योगावसरः इत्यादिविषयेषु अपि मार्गदर्शनं कृतम्।








# श्रीसोमनाथसंस्कृतविश्वविद्यालयः

राजेन्द्रभुवनमार्गः, वेरावलम्-३६२ २६६, गीरसोमनाथ-जनपदः (गुजरातम्)

दूरभाषः ०२८७६-२४४५२८/२९/३२ फेक्स – २४४४१७, वेबसाइट www.sssu.ac.in Email: sssu.veraval@gmail.com

## अभ्यासक्रमः शुल्क-विवरणं च

| क्रमः | अभ्यासक्रमाः | विषयाः | न्यूनतम-योग्यता | अवधिः | शुल्कम्* (Boys) | शुल्कम्* (Girls) |
|---|---|---|---|---|---|---|
| १ | विद्यावारिधिः (Ph.D.) | साहित्यम्, वेदः, पुराणम्, ज्योतिषम्, दर्शनम्, व्याकरणम् | आचार्यः/M.A. 55% अङ्कैः सह | Min 3 Years Max 6 Year | 24,800/- | 24,800/- |
| २ | तत्त्वाचार्यः (M.Phil.) | साहित्यम्, वेदः, पुराणम्, ज्योतिषम्, दर्शनम्, व्याकरणम् | संस्कृते आचार्यः/M.A. | 1 Years | 4400/- | 4400/- |
| ३ | आचार्यः (M.A.) | साहित्यम्, वेदः, पुराणम्, ज्योतिषम्, सर्वदर्शनम्, व्याकरणम् | संस्कृतमुख्यविषयेन सह स्नातकोपाधिः | 2 Years | 3800/- | 1400/- |
| ४ | M.A. | योगः | स्नातकोपाधिः | 2 Years | 7200/- | 7200/- |
| | | संस्कृतम् (General Hindu Studies) | स्नातकोपाधिः | 2 Years | To be fixed | To be fixed |
| ५ | संयुक्त-शास्त्रि-शिक्षाशास्त्री (Integrated B.A., B.Ed.) | संस्कृतम् | १२तमा कक्षा | 4 Years | To be fixed | To be fixed |
| ६ | शास्त्री (B.A.) | साहित्यम्, वेदः, पुराणम्, ज्योतिषम्, सर्वदर्शनम्, व्याकरणम् | १२तमा कक्षा | 3 Years | 5500/- | 1900/- |
| ७ | पदविका (Diploma) | योगः, ज्योतिषम्, कर्मकाण्डम्, संस्कृतशिक्षणम्, वास्तुशास्त्रम्, मन्दिरव्यवस्थापनम् | १२तमा कक्षा | 1 Years | *500/- | *500/- |

* अत्र निर्दिष्टं शुल्कं समग्रस्य अभ्यासक्रमस्य कृते अस्ति। *एतत् मुख्यकेन्द्रे स्वीक्रियमाणं शुल्कम् अस्ति।

※ परीक्षा-शुल्कम् – प्रतिसत्रम् – शास्त्री ६५०/-, आचार्यः ७००/-, डिप्लोमा ५००/-

### प्रवेशाय सम्पर्कं कुर्वन्तु-

- **डॉ. नरेन्द्रकुमार पण्ड्या**, प्रधानाचार्यः, ९८९८५४०४०३
- **डॉ. पङ्कजकुमार रावलः**, अध्यापकः, ९८७९३२९८९८
- **श्री जयदीपसिंह परमार**, जु. क्लर्क, ७३५९५१७४००
- **डॉ. ललितकुमार पटेलः**, अध्यक्षः, ९८७९८३४०७१
- **डॉ. दीपेश कतिरा**, अध्यापकः, ९५९४३५६८५७
- **श्री करसन छात्रोडिया**, जु. क्लर्क, ९८२४९६६०२२



कार्यालयः – ०२८७६-२४४५३२/३३ Web: www.sssu.ac.in Email: sssu.veraval@gmail.com